॥ श्री मद्धनुमभीममध्वांतर्गतरामकृष्णवेदव्यासात्मकश्रीलक्ष्मीहयग्रीवायनमः ॥




## श्री जगन्नाथयतिकृत

# सूत्रदीपिका

**Edited and Gist in English by**

**Dr. V R Panchamukhi, M.A. Ph.D**

**Former Chancellor of RSVP, Tirupati.**

## ॥ प्रथमोध्यायय: (समन्वयाध्याय:) ॥

A Knowledge Sharing Initiative by

**MADHWA YUVA PRATISHTHANA ®**

BENGALURU - 560050

**Dear Haribhaktas,**

**As you are all aware that MYP under its Knowledge Sharing Initiative, has been presenting in series to its readers, the extracts from the book : श्री जगन्नाथ यतिकृत ब्रह्मसूत्रदीपिका - Gist in English by Dr V R Panchamukhi, on a regular basis i.e. one** *Sutra* **a day - starting from holy day of the** *Vijayadashami* **- and blissful** *Sri Manmadhwa Jayanti,* **last year (October 22, 2015).**

**By now, we have shared each** *Sutra* **of all four Padas (135** *Sutras***) and also the compiled in .pdf documents of first three** *Padas* **separately.**

**MYP appreciates the overwhelming, positive and encouraging response from various attentive readers who have welcomed this Initiative of MYP.**

**Now, on the auspicious occasion of *Sri Gurusarvabhowma Sri Raghavendra Swamiji's Aradhana Mahotsava and MYP's Eighth Anniversary,* MYP is pleased to present this compilation of 135** *Sutras* **of entire** *Prathama Adhyaya* **in a .pdf document as MYP's *Jnana Pushpa- 4* to enable them to down load the same and keep it for their ready reference and records.**

**MYP is indebted to the timely and scholarly editorial support renderd by its well-wisher, Sri Narahari, from Washington DC, USA. in bringing out this edition of Jnana Pushpa- 4.**

**About the Book:**

**The book: श्री जगन्नाथ यतिकृत ब्रह्मसूत्रदीपिका - Edited & Gist in English by Dr V R Panchamukhi, has been published in the year 2002 by Rashtriya Sanskrit Vidyapeetham, (A deemed University), Tirupati (A.P).**

*Shri Jagannathatirtha* **(***circa* **1755-1770) the celebrated pontiff of** *Shri Vyasaraja Matha* **- one of the main lineages of** *Shri Manamadhwacharya,* **is also known as** *Bhashyadipikakara,* **for his very elaborate and comprehensive commentary on** *Brahmasutrabhashya* **of Shri Manmadhwacharya. His** *Sutradeepika* **is a direct gloss on** *Shri Manamadhwacharya's Bhashya***. The** *Sutradeepika* **though very brief, is very helpful in understanding the purport of the** *Sutras***.**

**The presentation of gist in English by Dr. V R Panchamukhi, the former Chancellor of Rashtriya Sanskrit Vidyapeetham, (A deemed University), Tirupati (A.P) is beneficial to the young students of** *Vedanta***, who would definitely appreciate the succinct account of the main messages of** *Brahmasutras* **without engaging themselves into long discussions on textual polemics. Dr V R Panchamukhi, is an internationally renowned economist, and is equally conversant with the** *Dwaita Vedanta* **school of philosophy. The very lucid and extremely helpful summary of the main message of the** *Brahmasutras* **given by Dr. V R Panchmukhi, itself speaks his erudition in** *Dwaita Vedanta***. Dr V R Panchamukhi is presently the** *Kulapati* **of Sri Guru Sarvabhowma Vidyapeetha, Mantralaya (A.P).**

**Badarayanapraneeta Brahmasutras:**

***Brahmasutras* were composed at the fag end of *Dwapara Yuga,* when the correct knowledge was clouded by wrong interpretation; Lord *Mahavishnu* himself manifested as *Vedavyasa* and composed *Brahmasutras.* His other names are *Dwaipayana, Krishnadwaipayana, Vashishtha Krishna, Badarayana, Parasarya or Satyavteya.***

***Brahmasutras* constitute the highest text of entire sacred literature; It is *Paravidya,* the scripture par-excellence and convey central text of the *Vedanta* philosophy. The *Vedanta* doctrines enshrined in the *Vedas* and *Upanishads* are critically summarized in the *Brahmasutras*. The text of *Brahmasutras* is handed down in each tradition and in *Dwaita Vedanta* tradition, there are 564 *Sutras.* They are arranged in four *Adhyayas* and each *Adhyaya* consists of four *Padas*. Within each *Pada* the *Sutras* are arranged into certain *Adhikaranas* consisting one or more *Sutras*.**

**The *Brahmasutras* have been commented upon by great *Acharyas,* and such commentaries are called *Brahmasutrasbhashyas. ShrI Manmadhwacharya,* the founder of system of *Dwaita Vedanta* philosophy also wrote illustrious bhAShya on *Brahmasutras*. Some great saint-scholars in *Dwaita Vedanta* tradition have also written compendium on the *Brahmasutras*, highlighting the meaning as per the tradition contained in the *Sutras*. The *Tantradeepika* of *Shri Raghavendra Tirtha* and *Sutradeepika* of *Shri Jagannatha Tirtha* are the excellent works under this category.**

**The study of this work helps us in understanding the purport of the *Brahmasutras* without going into disputation and refutation.**

**Here the original text of *Sutradeepika* and index of *Sutras* are presented to enhance the utility of the book published.**

**॥ श्री कृष्णार्पणमस्तु ॥**

- **Team MYP**

*Durmukha, Shravana Krishna Dwitiya*
*Sri Guru Sarvabhowma Sri Raghavendra Swamiji's Aradhana,*
**MYP's Eighth Anniversary,**
**Aug 20, 2016**

# श्री कृष्णद्वैपायन कृत ब्रह्मसूत्राणि
# श्री जगन्नाथयतिकृत सूत्रदीपिका सहितानि ।

| श्री मद्धनुमभीममध्वांतर्गत रामकृष्ण वेदव्यासात्मकश्रीलक्ष्मीहयग्रीवायनमः |

॥ हरिःॐ ॥

कृष्णं रामं नरसिंहं व्यासं नत्वा गुरुनपि ।
जगन्नाथाख्य यतिना क्रियते सूत्रदीपिका ॥

## ॥ प्रथमोध्याययः (समन्वयाध्यायः) ॥

### ॥ प्रथमः पादः (अन्यत्रप्रसिद्धनामात्मकशब्दसमन्वयपादः ॥

### ॥ जिज्ञासाधिकरणम् ॥ 1-1-1 ॥

1-1-1. ॥ ॐ ॐ अथातो ब्रह्मजिज्ञासा ॐ ॥ 1 ॥

अथ अध्ययन शमदमादि-रूपाधिकारसम्पत्यनन्तरम् । अतः मोक्ष्याख्यप्रयोजनस्य सत्त्वाद्विष्णोःप्रसादाद्वा ॥ ॐ गुणपूर्णस्य ब्रह्मणोः विष्णोः जिज्ञासा श्रवणादिरूपा कर्तव्येत्यर्थः ॥ 1 ॥

1.1.1 After acquiring eligibility through means such as studies. self-control and devotion in Lord, one should inculcate the curiosity to know more about the *Brahma*, because it is through such knowledge that one can achieve *Moksha* through the benevolence of Supreme Lord. ll 1 ll

### ॥ जन्मादिधिकरणम् ॥ 1-1-2 ॥

1-1-2 ॥ ॐ जन्माद्यस्य यतः ॐ ॥2 ॥

अस्य प्रमितजीवजडात्मकप्रपञ्चस्य यतः यस्मात् । जन्मादि सृष्टाद्यष्टकं । भवतीति श्रुतं तदेव ब्रह्म नान्यादित्यर्थः ॥ 2 ॥

**1-1-2. The *Brahma* is the one from whom the entire Universe gets creation, existence, destruction, control, knowledge, ignorance bondage, liberation etc. II 2 II**

### ॥ शास्त्रयोनित्वाधिकरणम् ॥ 1-1-3 ॥

### 1-1-3 ॥ ॐ शास्त्रयोनित्वात् ॐ ॥ 3 ॥

नानुमानतः रुद्रादेर्जगत्कारणत्वम् कल्पनीयम् । कुतः? शास्त्रयोनित्वात् शास्त्रम् ऋगादिरूपं योनिः ज्ञप्तिकारणं यस्य तच्छास्त्रयोनि । तस्य भावः शास्त्रयोनित्वं तस्मात् जगत्कारणं ब्रह्म । शास्त्रैकसमधिगम्यत्वादित्यर्थः ॥ 3 ॥

**1-1-3. We know about the features of the *Brahma* through all *Shastras*. II 3 II**

### ॥ समन्वयाधिकरणम् ॥ 1-1-4 ॥

### 1-1-4 ॥ ॐ तत्तु समन्वयात् ॐ ॥ 4 ॥

तु शब्द एवार्थे । तदेव विष्ण्वाख्यं ब्रह्मैव । सं मुख्यतः सर्वशास्त्रयोनि न रुद्रादिः । कुतः? समन्वयात् समीचीनोपक्रमादितात्पर्यलिङ्गादित्यर्थः ॥ 4 ॥

**1-1-4. The subject matter of *Shastras* is *Brahman* only. We can draw appropriate meanings of all the *Shastras* only through the proper use of means such as *Upakrama*, *Upasamhara* etc. II 4 II**

### ॥ ईक्षत्यधिकरणम् ॥ 1-1-5 ॥

### 1-1-5 ॥ ॐ ईक्षतेर्नाशब्दम् ॐ ॥ 5 ॥

तद्ब्रह्म । अशब्दं न, शब्दवाच्यं न, किं-तु वाच्यमेव, कुतः? ईक्षतेः ईक्षतिर्ज्ञानम् । तद्विषयत्वादित्यर्थः ॥ 5 ॥

**1-1-5. We cannot say that the Supreme Lord *Brahma* cannot be understood through *Shastras*, because it has been described at several places that He is the object of knowledge. II 5 II**

## 1-1-6 II ॐ गौणश्चेन्नात्मशब्दात् ॐ II 6 II

**गौणः सत्त्वादिगुणबद्धो जीव एव | "स एतस्मादिति"( प्र.-5.5 ) ईक्षतिश्रुत्युक्त इति चेन्न | कुतः ? आत्मशब्दात्| ईक्षणीयवस्तुनि आत्मानं पश्येदित्यात्मशब्दश्रवणादित्यर्थः II 6 II**

**1-1-6. We cannot say that the Jiva who is bound by the three *guNas*, viz. "*sattwa, rAjas, tAmas*" is the subject matter of all *shAstras*, because at the appropriate places the subject matter all *Atman*, *puruSha*, *Brahma*, etc. that can be only *Vishnu*. II 6 II**

## 1-1-7 II ॐ तन्निष्ठस्य मोक्षोपदेशात् ॐ II 7 II

**तन्निष्ठस्य परमात्मज्ञानिनः| मोक्षोपदेशात् "यस्यानुवित्तः" ( बृ.उप. 6-4-13) इत्यादौ मोक्षस्य श्रुतत्वात् | आत्मशब्दमुख्यवाच्यो न जीव इत्यर्थः| II 7 II**

**1-1-7.*Jiva* cannot be the meaning of the word *Atman*, because it is propounded that those who acquire the knowledge of *Atman* would achieve** mOkSha. **Obviously, we cannot achieve** mOkSha **by knowing *Jiva*. II 7 II**

## 1-1-8 II ॐ हेयत्वावचनाच्च ॐ II 8 II

**हेय वचनात् ब्रह्मणो मोक्षार्थे प्राधान्येनाज्ञेयत्वरूपहेयत्वस्याप्रतिपादनात् प्रत्युत "जानथेति" अहेयत्वात्ववचनाच्च न गौणः आत्मशब्दवाच्यः| किं-तु निर्गुणो विष्णुरेवेत्यर्थः II 8 II**

**1-1-8.Further, it is propounded in the *shAstras* that for achieving *MokSha* we should primarily know the *Brahma* and discard our ignorance about Him. II 8 II**

## 1-1-9 II ॐ स्वाप्ययात् ॐ II 9 II

**स्वस्य स्वस्मिन् अप्ययात् अप्ययपदोत्कलयवचनात्| आत्मानं विलापयतीति श्रुत्युक्तो निर्गुण एव न गौणः|अत एव चासौ शब्दवाच्य इत्यर्थः II 9 II**

**1-1-9.** The word *Atman* should refer to *paramAtman* and not to *jIva* because it is stated that *Atman* has the capacity to absorb Himself within Himself. This capacity is not possible for *jIva*. II 9 II

1-1-10 II ॐ गतिसामान्यात् ॐ II 10 II

गतेर्नानाशाखाजन्यज्ञानस्य|सामान्यात् एकरूपत्वश्रवणात्| न विष्णोरन्यः कारणत्वेन शाखान्तरप्रतिपाद्य इत्यर्थः II 10 II

**1-1-10.** We can draw the inference that *viShNu* is the sole cause for the Universe because the different section and parts of the *shAstrAs* convey the same meaning. II 10 II

1-1-11 II ॐ श्रुतत्वाच्च ॐ II 11 II

"एको देवः" इति (श्वे.6-11) श्रुत्युक्तत्वाच्च ना शब्द वाच्यं ब्रह्मेत्यर्थः II 11 II

**1-1-11.** We have also many statements in the *shAstrAs* that there is only one Supreme Lord and He can be explained only through *Agama*. II 11 II

## II आनन्दमयाधिकरणम् II 1-1-6 II

1-1-12 II ॐ आनन्दमयोऽभ्यासात् ॐ II12 II

आनन्दमयादिशब्दवाच्यो विष्णुरेव न प्रकृत्यादिः|कुतः? अभ्यासात् प्रतिप्रकरणमानन्दमयादौ ब्रह्मशब्दश्रवणादित्यर्थः II 12II

**1-1-12.** The terms like *"annamaya", "prANamya", "manOmaya", "vijnyAnamaya" and "Anandamaya"* that figure in *shRutis* refer only to the Lord *viShNu* because in each*prakaraNa*, the word *Brahma* is used repeatedly. These terms do not refer to the cells of the body etc. II12 II

1-1-13.II ॐ विकारशब्दान्नेति चेन्न प्राचुर्यात् ॐ II 13 II

विकारशब्दात् विकारार्थकमयट्शब्दात् आनन्दमयादिविष्णुर्नेति चेन्न| कुतः? प्राचुर्यात् मयट्शब्दस्य प्राचुर्यपदोक्तपूर्णत्वा-भिधायकत्वादित्यर्थः II 13 II

**1-1-13.** We cannot say that *Anandamaya* is not *Brahman*, because the suffix "*Mayat*" is to be interpreted to mean transformation. *Anandamaya* is

*Brahman* because, "*Mayat*" should be interpreted to mean full and complete. II 13 II

1-1-14 II ॐ तध्देतुव्यपदेशाच्च ॐ II 14 II

चः समुच्चये| तस्य आनन्दमयस्य| विष्णुत्वे लोक चेष्टकत्वाख्यहेतोर्व्यपदेशात्|को होवान्यात् इति (तै.उप. 2-8) श्रुतौ उक्तत्वाच्चानन्दमयो विष्णुरेवेत्यर्थः॥ 14 II

**1-1-14. This latter interpretation is corroborated by the statement that *"Anandamaya"* is the one who regulates and sets into action the entire Universe and it is well accepted that the Lord *viShNu* is the only such personality. II 14 II**

1-1-15 II ॐ मान्त्रवर्णिकमेव च गीयते ॐ II 15 II

यतः मान्त्रवर्णिकं सत्यं ज्ञानमनन्तं ब्रह्मेति मन्त्रवर्णोक्तं ब्रह्म गीयते आनन्दमयादिशब्दैः प्रतिपाद्यते| अत आनन्दमयादिशब्दवाच्चं ब्रह्मैवेत्यर्थः॥ 15 II

**1-1-15. Further, the personality referred to by *"Anandamaya"* is also described by the terms, such as *"Satya", "JnAna", "Ananta" and "Brahma"*. All these features apply only to Lord "*viShNu*". II 15 II**

1-1-16 II ॐ नेतरोऽनुपपत्तेः ॐ II 16 II

इतरः चतुर्मुखादिः| न| कुतः? अनुपपत्तेः ब्रह्मविदाप्नोति परम् इति (तै.उप.2-1-1) मोक्षजनकज्ञानविषयत्वायोगादित्यर्थः II 16 II

**1-1-16. Personalities like *Chaturmukha Brahma* etc. are not referred by the term*"Anandamaya"*** because it is clearly stated that the one who knows Brahma would be one who realises *MokSha*. Such a result is not possible with the knowledge of *Chaturmukha Brahma*. **II 16 II**

1-1-17 II ॐ भेदव्यपदेशाच्च ॐ II 17 II

चतुर्मुखादेरानन्दमयस्य भेदकधर्मोक्तेश्च नानन्दमय इतर इत्यर्थः II 17 II

**1-1-17. Further, at many places it has been clearly stated that the characteristics of *Chaturmukha Brahma* differ from *"Anandamaya"*. II 17 II**

1-1-18 II ॐ कामाच्च नानुमानापेक्षा ॐ II 18 II

**अद्वैतश्रुत्यनुकूलानुमानस्याभावात् केवलानुमानस्य च कामात् इच्छामनुसृत्य प्रवृत्तत्वान्नानुमानापेक्षा अतीन्द्रियार्थविषये शुष्कानुमानापेक्षा न कार्येत्यर्थः II 18 II**

**1-1-18. In the task of deriving meanings and interpretations for the subjects beyond the scan of our sense organs, we cannot resort to the use of *"AnumAna"* - the Deductive Logic, because the latter is amenable to subjective manipulations. II 18 II**

1-1-19 II ॐ अस्मिन्नस्य च तद्योगं शास्ति ॐ II 19 II

**युक्तिसमुच्चये चशब्दः| यतः अस्मिन्नानन्दमयप्रकरणे मोक्षेऽप्यस्य जीवस्य| तद्योगम् आनन्दमयादिना योगं सम्बन्धम्| शास्ति श्रुतिः प्रतिपादयति|अतोऽपि आनन्दमयादिः ब्रह्मैव न देहादिरित्यर्थः II 19 II**

**1-1-19. *"Anandamaya"* should be Lord *Vishnu* and not the human bodies or *Jiva* because it is described that even in the *Moksha*, *Jiva* will have to keep some form of association with the *Brahma* and, therefore, *Jiva* and *Brahma* will have to be different from each other. II 19 II**

II अन्तःस्थत्वाधिकरणम् II 1-1-7 II

1-1-20 II ॐ अन्तस्तद्धर्मोपदेशात् ॐ II 20 II

**अन्तः "अन्तः प्रविष्टम् इति" (तै.आ.3-1) हृदयान्तः श्रुतं ब्रह्मैव न इंद्रादिः| कुतः? तद्धर्मोपदेशात् तस्मिन्नन्तः श्रुते क्षीराब्धिमध्यवर्त्तित्व - प्रलयोदधिस्थितत्व ब्रह्माण्डवीर्यत्वादिरूप विष्णुधर्माणामन्तः समुद्र (तै.आ.3-11-1) इत्यादौ श्रुतत्वादित्यर्थः II 20 II**

**1-1-20. The entity which is described to be within our hearts is the Supreme Lord*Brahma* Himself and not other Gods such as "*Indra*", because in the same chapter it is mentioned that the entity existing within our hearts is the one who resides in the middle of *Kshirasagara* and *Pralayasagara* and also He is vitality of the entire*Brahmanda* and all these features apply only to Lord *Vishnu*. II 20 II**

1-1-21 ॥ ॐ भेदव्यपदेशाच्चान्यः ॐ ॥ 21 ॥

**न केवलमन्तस्थो विष्णुः किं तु इन्द्रादिभ्योऽन्यश्च । कुतः? भेदव्यपदेशात् तस्य तदन्तर्यामित्वतत्प्रेरकत्वादिरूपभेदक- धर्मश्रवणादित्यर्थः ॥ 21 ॥**

**1-1-21. Further, it is clearly stated in the *Shrutis* that the entity inside our hearts has distinct characteristics from those of other Gods such as *Indra, Chaturmukha Brahma*etc. It is stated that Lord *Vishnu* resides within *Indra, Brahma* etc. as their regulator, and hence he must be different from them. ॥ 21 ॥**

॥ आकाशाधिकरणम् ॥ 1-1-8 ॥

1-1-22 ॥ ॐ आकाशस्तल्लिङ्गात् ॐ ॥ 22 ॥

**आकाशः आकाश शब्दवाच्यो विष्णुरेव, न प्रसिद्धाकाशः। कुतः? तल्लिङ्गात् छन्दोग (छ. 1-9) श्रुत्युक्ताकाशे परोवरियस्त्वादिरूपविष्णुलिङ्गस्य श्रवणादित्यर्थः ॥ 22 ॥**

**1-1-22. The entity referred to by the word *Akasha* essentially means *Vishnu* only and not the usual *Bhoutika Akasha* viz. sky, because, in the *Chhandogya Upanishad*, where the word *Akasha* is used, the characteristics of *Vishnu* are also stated, with reference to *Akasha*. ॥ 22 ॥**

॥ प्राणाधिकरणम् ॥ 1-1-9 ॥

1-1-23 ॥ ॐ अत एव प्राणः ॐ ॥ 23 ॥

**"तद्वै त्वं प्राणो अभवः" इत्युक्तः प्राणो विष्णुरेव नान्यः। कुतः? अत एव "श्रीश्च ते" (तै.आ.3-13) इति श्रीपतित्वलिङ्गादेवेत्यर्थः ॥ 23 ॥**

**1-1-23. The word *Prana* also essentially refers to Lord *Vishnu*, because of similar reasoning that the characteristics of *Vishnu* such as being *Sripati* (husband of Goddess *Lakshmi*) are attributed to *Prana*. ॥ 23 ॥**

## ॥ ज्योतिरधिकरणम् ॥ 1-1-10 ॥

### 1-1-24 ॥ ॐ ज्योतिश्चरणाभिधानात् ॐ ॥ 24 ॥

ज्योतिः ज्योतिश्शब्दवाच्यं ब्रह्मैव नत्वन्यत्| कुतः? चरणाभिधानात् कर्णादीनां विचरणाभिधानात्|(ऋ .6-9-6) "वि मे कर्णा" इति ज्योतिषः साकल्येन कर्णादिविदूरत्व श्रवणादित्यर्थः ॥ 24 ॥

1-1-24. The entity referred by the word *Jyotish* also means Para Brahma because *Jyotish* is described to be unfathomable by all the sense organs because of its immense potency, which is the feature of Lord *Vishnu* Himself. II 24 II

## ॥ छन्दोऽभिधानाधिकरणम् ॥ 1-1-11 ॥ (गायत्राधिकरणम्)

### 1-1-25 ॥ ॐ छ्न्दोऽभिधानान्नेति चेन्न तथा चेतोऽर्पणनिगदात्तथा हि दर्शनम् ॐ ॥ 25 ॥

छन्दोऽभिधानात्| ननु, छन्दोगश्रुतिस्थगायत्रिपदेन चतुर्विंशात्यक्षरात्मकच्छन्दसः प्रतिपादनात् गायत्रिशब्दवाच्यो विष्णुनैति चेन्न| कुतः? तथा हि दर्शनं हि यस्मात्तथा गानत्राणकर्तृत्वनिमित्तेन दर्शनं विष्णोः गायत्रीशब्दवाच्यत्वप्रातिपादिका (छ.3.12.1) "गायति त्रायति च" इति श्रुतिरस्ति| तस्मात व्यर्थं गायत्रीपदेन विष्णोरभिधानमित्यत उक्तं तथेत्यादि| तथा चेतोर्पण निगदात् विष्णोस्तथा गायत्र्यादिशब्दप्रवृत्तिनिमित्तवत्वेन चेतसि अर्पणाय उपासनाय| निगदाच्छुतौ प्रतिपादनादित्यर्थः| तथा च न वैयर्थ्यमिति भावः ॥ 25 ॥

1-1-25. The term *Gayatri* used in *Chandogya Shruti* does not essentially refer to 24 syllable *Gayatri Chandas*. Because there is *Vedic* evidence to prove that *Gayatri* means the one who protects and who sings in joy, which means Lord *Vishnu*. *Shruti* preaches that it is how Lord *Vishnu* is to be praised. II 25 II

### 1-1-26 ॥ ॐ भूतादिपादव्यपदेशोपपत्तेश्चैवम् ॐ ॥ 26 ॥

एवमित्यस्यावृत्तिः| एवं गायत्रिशब्दवाच्यं ब्रह्मत्येवमेव युक्तम्| कुतः? एवं भूतादिपादव्यपदेशोपपत्तेः| "पादोऽस्य विश्वाभूतानि त्रिपादस्यामृतं दिवीति" (छ. 3.12.6)| एवं रूपभूतामृतांशवत्त्वोक्तेश्च तस्य च विष्णावेवोपपत्तेः अन्यत्रानुपपत्तेश्चेत्यर्थः ॥ 26 ॥

**1-1-26. Further, the word *Gayatri* should refer only to Lord *Vishnu* because having described *Gayatri* as to the one with four *Padas*, the *Shruti* describes four *Padas* as - All the beings, the Forms in Vaikuntha, *Shwetadweepa, and Ananatasana*, while this description is applicable only to Lord *Vishnu*.II 26 II**

### 1-1-27 II ॐ उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात् ॐ II 27 II

**उपदेशभेदात् गायत्रीज्योतिषोः ध्युस्थत्व "त्रिपादस्यामृतं दिवि" (छ.3.12.6) दिवः परत्व परो दिवः रूप विरुध्द धर्मभोधकश्रुतिभेदान्नेति चेत्तद्वयं विष्ण्वाख्यमेकं वस्तु न किं तु भिन्नमेवेति चेन्न|कुतः? उभयस्मिन् श्रुतिवाक्येऽपी एकस्य प्रतिपाद्यत्त्वेऽऽपि अविरोधात्| त्रिसप्तलोकविवक्षया अविरोधाभावादित्यर्थः II 27 II**

**1-1-27. We cannot argue that because different characteristics are attributed to *Gayatri* and *Jyotish*, they should not refer to a single entity called *Vishnu*. For example, *Gayatri* is described as an entity in *Dyuloka*, while *Jyotish* is described as an entity beyond *Dyuloka*. However, the two features can be mutually reconciled by proper definition of *Dyuloka* according to the context of the description. II 27 II**

## II पादान्त्यप्राणाधिकरणम् II 1-1-12 II

### 1-1-28 II ॐ प्राणस्थस्थाऽनुगमात् ॐ II 28 II

**तथा "तद्वै त्वम्" इति (तै,आ.3-14-4) तैत्तिरीयोक्तप्राणवत् "ता वा एताः" इत्तैतरेयोक्तप्राणोऽपी विष्णुरेव| कुतः? अनुगमात् देवतोपास्यत्वादिविष्णुलिङ्ग ब्रह्मशब्दानां असकृच्छ्रवणात् इत्यर्थः II 28 II**

**1-1-28. The word *Prana* appearing in the *Aitareya Shruti* should refer to Lord *Vishnu* only and not to *Indra, Jiva* or *Mukhya Prana*, because the various features of *Vishnu*, such as being worshipped by all, the term *Brahma* are repeatedly mentioned in the same *Prakarana*. II 28 II**

### 1-1-29 ॥ ॐ न वक्तुरात्मोपदेशादिति चेदध्यात्मसम्बन्धभूमा ह्यस्मिन् ॐ ॥ 29 ॥

**द्वितियार्थे षष्टी| वक्तुः बृहतीसहस्रवक्तारं विश्वामित्रं प्रति इन्द्रेणात्मोपदेशात्| आत्मनः स्वस्य प्राणतयोपदेशात् इन्द्र एवायं प्राणः न विष्णुरिति चेत्| न इति शेषः| तस्यावृत्तिः| अनुगमादित्यनुवर्तते | तथा च प्रागुक्तानुगमहेतोः नेन्द्रः प्राणः | तथा सत्युपदेशविरोध इत्यपि न|कुतः? यस्मात् अस्मिन्प्रकरणे भगवतः अध्यात्मसंबन्धभूमा इन्द्रविश्वामित्रादिरूपबहुदेहसम्बन्धः उक्तोऽस्ति तस्मादित्यर्थः | यद्वा हि यस्मात् अस्मिन्निन्द्रे | अध्यात्मसंबन्धभूमा | अधि अधिकस्यात्मनः सम्बन्धस्यावेशस्य भूमा बाहुल्यं विद्यते तस्मादित्यर्थः ॥ 29 ॥**

**1-1-29. While preaching *Brahati Shasra* by *Vishwamitra*, *Indra* seems to make a statement that he himself is *Prana*. However, the correct meaning of his statement is that Lord *Vishnu* is all pervasive and Lord *Vishnu* himself in the form of *Prana* also controls the activities of *Indra*. II 29 II**

### 1-1-30 ॥ ॐ शास्त्रदृष्ट्या तूपदेशो वामदेववत् ॐ ॥ 30 ॥

**तु शब्द एवार्थे| वामदेववत् यथा अंतर्यामिविवक्षया वामदेवर्षिः "अहं मनुरभवम्" इति स्वस्य मनुसूर्याद्यैक्यमाह तद्वत्|शास्त्रदृष्ट्या शास्ति सर्वमिति शास्त्रमन्तर्यामी तद्दृष्ट्या तद्विवक्षयैवोपदेशः प्राणोऽहमिति व्यपदेशः| न त्वैक्येनेत्यर्थः ॥ 30 ॥**

**1-1-30. *Vamadevamuni* has stated that he is *Manu*, meaning thereby that Lord *Brahman*was pervading the form of *Manu*. In the same way, the statement of *Indra* that *Prana*is he himself, should be interpreted to mean that *Prana* in him is the inner motive force, Thus, *Prana* in this context, should essentially be *Brahman*. II 30 II**

### 1-1-31 II ॐ जीवमुख्यप्राणलिङ्गान्नेति चेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात् ॐ II 31 II

**जीवमुख्यप्राणलिङ्गात् शतायुष्ट्वादिजीवलिङ्गानां इन्द्रियदेवैः संवादादिरूपमुख्यप्राणलिङ्गानां च श्रवणात् (अयि.आ. 2-2-4) " तावन्ति शतसंवत्सरस्य ", "ता अहिंसंतेति" (अयि.आ. 1-2-4) प्राणो अन्य एव न विष्णुरिति चेन्न| कुतः? अनुगमात् | न च लिङ्गविरोधः| तल्लिङ्गानां अन्तर्यामि विषयत्वोपपत्तेरित्यादिकमध्याहार्यम्| किमर्थमन्तर्यामि - कथनमित्यत उक्तम् उपासात्रैविध्यादिति | अन्तर्बहिः सर्वगतभेदेन ब्रह्मोपासनस्य त्रिविधत्वात् इह प्रकरणे | तत्त्रैविध्यस्याश्रितत्वात् उक्तत्वात्तद्योगात्तेषामधिकारिणां त्रिविधोपासनायोग्यत्वादित्यर्थः|तथा च तत्तच्छब्दैस्तत्तदधिकारिभेदेनोपासनार्थम् अन्तर्यामिकथनं युक्तमिति भावः II 31 II**

**1-1-31. It may appear that the features of *Jiva* such as living for one hundred years and those *Mukhya Prana* such as the use of the word *Prana* itself are narrated in this *Prakarana* and hence *Prana* should refer to *Jiva* or *Mukhya Prana* and not to *Vishnu*. This interpretation would not be correct because *Prana* has been described to be the subject of different forms of *Upasana* namely *Antah* (inside), *Vyapta* (all-pervasive), and *Bahih* (outside). There are relevant *Vedic* quotations in this regard and these different approaches of *Upasana* are relevant for different eligibility types of *Upasakas*. II 31 II**

|इति श्रीमत्कृष्णद्वैपायनकृत ब्रह्मसूत्रेषु प्रथमाध्यायस्य प्रथमः पादः|

| इति जगन्नाथयतिकृतायां सूत्रदीपिकायां प्रथमाध्यायस्य प्रथम पादः |

II श्री कृष्णार्पणमस्तु II

# श्री कृष्णद्वैपायन कृत ब्रह्मसूत्राणि
# श्री जगन्नाथयतिकृत सूत्रदीपिका सहितानि ।

|श्री मद्धहनुमभीम मध्वांतर्गत रामकृष्ण वेदव्यासात्मक श्रीलक्ष्मीहयग्रीवायनमः |

॥ हरिःॐ ॥

कृष्णं रामं नरसिंहं व्यासं नत्वा गुरुनपि ।
जगन्नाथाख्य यतिना क्रियते सूत्रदीपिका ॥

## ॥ प्रथमाध्यायः (समन्वयाध्यायः) ॥

## द्वितीयपादः (अन्यत्रप्रसिद्धलिङ्गात्मकशब्दसमन्वयपादः)

### ॥ सर्वगतत्वाधिकरणम् ॥ 1.2.1 ॥

1-2-1 ॥ ॐ सर्वत्र प्रसिद्धोपदेशात् ॐ ॥ 32 ॥

तत्त्विति वर्तते| सर्वत्र पृथिव्यादिषु | उच्यमानं वस्तु तत्तु नारायणाख्यं ब्रह्मैव न त्वन्यत् | कुतः? प्रसिद्धोपदेशात्| "एतमेव ब्रह्मेति" (ऐ आ ३-२-३-१२) सर्वगते वस्तुनि नारायणवाचित्वेन श्रुत्यादिप्रसिद्धब्रह्मशब्दश्रवणादित्यर्थः ॥ 32 ॥

**1-2-1. The characteristic of all pervasiveness is applicable to only *Vishnu* and not to entities like *Sun*, *Jiva* or *Prithvi* etc. because the entity described in this *Prakarana* is termed as *Brahma* - which is famous in the *Shrutis* to mean *Narayana*. II 32 II**

1-2-2 ॥ ॐ विवक्षितगुणोपपत्तेश्च ॐ ॥ 33 ॥

चः समुच्चये अवधारणे वा| सर्वगते| श्रुत्येति शेषः| तथा च विवक्षितानामितः परं सर्वगते श्रुत्या तन्निष्टतया वक्तुं योग्यानां वक्षमाणानां वा अश्रुतत्वादिगुणानां विष्णोरेव योग्यत्वेन तस्मिन्नेवोपपत्तेः अन्यत्रानुपपत्तेश्च विष्णोरेव सर्वगत इत्यर्थः ॥ 33 ॥

**1-2-2.*Vishnu* alone can be all pervasive entity because all the descriptions of an all-pervasive entity can be justifiably applied only to *Vishnu* and to none else. II 33 II**

## 1-2-3 ॥ ॐ अनुपपत्तेस्तु न शरीरः ॐ ॥ 34 ॥

**तु शब्द एवार्थे| शारीरो जीवः| आदित्यो वा| न सर्वगतः| कुतः? अनुपपत्तेः| एकस्य जीवस्य सर्वशरीरस्थत्वायोगादेवेत्यर्थः ॥ 34 ॥**

**1-2-3. *Jiva* or *Aditya* cannot be regarded as all pervasive because it is difficult to conceive that only one *Jiva* or one *Aditya* can pervade different bodies. II 34 II**

## 1-2-4 ॥ ॐ कर्मकर्तृव्यपदेशाच्च ॐ ॥ 35 ॥

**सर्वगते वस्तुनि "आत्मानमिति" ( ऐ आ ३-२-३) कर्मत्वस्य जीवे च शंसतीति तद्विरुद्धकर्तृत्वस्य व्यपदेशादुक्तत्त्वाच्च न जीवः सर्वगत इत्यर्थः ॥ 35 ॥**

**1-2-4.The all-pervasive cannot be the *Jiva* because, in the *Shrutis,* this entity is described as the object (*Karma*) and also the subject (*KartRu*). *Jiva* cannot have both these attributes simultaneously. II 35 II**

## 1-2-5 ॥ ॐ शब्दविशेषात् ॐ ॥ 36 ॥

**"एतमेव ब्रह्मेति" ( ऐ आ ३-३) वाक्ये ह्मशब्दस्यावधारणार्थक एवशब्दाख्यविशेषणवत्वात् ब्रह्मशब्दो न जीवपर इत्यर्थः ॥ 36 ॥**

**1-2-5.The word *Brahma* cannot mean *Jiva,* because, in the *Shruti,* there is an emphatic reference to the *Mukhya Brahma,* who can be only the Supreme Lord. II 36 II**

## 1-2-6 ॥ ॐ स्मृतेश्च ॐ ॥ 37 ॥

**चः समुच्चये| न केवलm श्रुत्युक्तत्वाद्ब्रह्मशब्दो न जीवपर इति किंतु "अहमात्मा गुडाकेश" (भ गी १०-२०) इत्यादिस्मृतिसद्भावाच्च ब्रह्मशब्दो न जीवपर इत्यर्थः ॥ 37 ॥**

**1-2-6. The all-pervasive entity is *Vishnu* only because in *Bhagavad Gitaa* the Lord clearly mentions that he pervades the hearts of all living entities. II 37 II**

1-2-7 ॥ ॐ अर्भकौकस्त्वात्तद् पदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्च ॐ ॥ 38 ॥

अर्भकौकस्त्वात् "सर्वेषु भूतेषु" (ऐ आ ३-१-३-१२) इति सर्वगतवस्तुनः सर्वप्राणिहृदयाकाशरूपाल्पस्थानत्वकथनात् | तद्व्यपदेशात् | तस्य जीवस्य तच्छ्रुतिलिङ्गादिना व्यपदेशात्| उक्तत्वाच्च | नेति चेत् ब्रह्मैव सर्वगतमित्त्युक्तं नेति चेन्न | कुतः ? तेषां विष्णावेवोपपत्तेरिति शेषः | न च वैयर्थ्यम् | एवं निचाय्यत्त्वात् | एवमर्भकौकस्त्वादिरूपेण विष्णोरेवोपास्यत्वात् | तथा च न वैयर्थ्यमितिभावः | शृतिलिङ्गादीनां ब्रह्मपरत्वेन न तद्विरोध इति भावः | व्याप्तस्य विष्णोः कथमल्पस्थानस्तिथिरित्यत उक्तं व्योमवच्चेति | यथाऽऽकाशस्य व्याप्तस्यापि गुहाद्येकदेशावस्थितिः तद्वद्विष्णोरपीत्यर्थः ॥ 38 ॥

1-2-7. We cannot argue that *Brahman* is not the all-pervasive entity on the ground that the entity is described to reside in a limited space and also that it is supposed to possess the organs like eyes etc. and an all-pervasive entity cannot remain confined to a small place and it does not have the organs like eyes etc. However, we should recognise that the attribute of residing in the small place of everybody's heart and also that it has organs like the eyes, are described only to facilitate the worshipping of the all-pervasive entity with those attributes. Further, it is possible to conceive that like *Aakaasha* or Space, an all-pervasive entity could also be confined to a small place. II 38 II

1-2-8 ॥ ॐ सम्भोगप्राप्तिरिति चेन्न वैशेष्यात् ॐ ॥ 39 ॥

यतो ब्रह्मणः व्योमवत् सर्वजीवशरीरस्थत्वे सम्भोगप्राप्तिः समानभोगप्राप्तिरित्यतो बाधकान्न ब्रह्म सर्वगतमिति चेन्न कुतः ? वैशेष्यात् विष्णोः सामर्थ्यविशेषवत्वादित्यर्थः| तथा च न तस्य जीवसमानभोगप्राप्तिरिति भावः ॥ 39 ॥

1-2-8 39. We cannot argue that if the all-pervasive entity remains inside the body acquired by each *Jiva,* then such an entity will have to experience the same happiness and miseries as experienced by the *Jiva* in that body. Such an entity is free from all the experience of *Jiva,* because of its special capabilities. II 39 II

## ॥ अत्तृत्वाधिकरणम् ॥ 1-2-2 ॥

### 1-2- 9 ॥ ॐ अत्ता चराचरग्रहणात् ॐ ॥ 40 ॥

**अत्ता "सर्वं वा अत्ति" इत्युक्त सर्वात्ता विष्णुरेव | न त्वदितिः | कुतः ? चराचरग्रहणात् | चराचरस्य चेतनाचेतनात्मकप्रपञ्चस्य "सर्वं" इति श्रुतौ अद्यतयोक्तत्वादित्यर्थः ॥ 40 ॥**

**1-2-9.The entity which swallows all the elements of the Universe is *Brahma* and not *Aditi*. Because the word *Charaachara* - living and non-living has been used in this context, and it is only *Brahma* who has the capability of swallowing the living and non-living. II 40 II**

### 1-2-10 ॥ ॐ प्रकरणाच्च ॐ ॥ 41 ॥

**नैवेह किञ्चनेति विष्णुप्रकरणबलाच्च विष्णुरेव अत्तेत्यर्थः ॥ 41 ॥**

**1-2-10. Further, all swallowing entity is *Brahma* only because this attribute is described in the *Prakarana* of *Bruhadaaranyaka* related to *Brahman*. II 41 II**

## ॥ गुहाधिकरणम् ॥ 1-2-3 ॥

### 1-2-11 ॥ ॐ गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् ॐ ॥ 42 ॥

**तत्त्विति वचनविपरिणामेनानुवर्तते | आत्मानौ आदेयं मातीति व्युत्पत्त्या "ऋतं पिबन्तौ" ( कठ १-३-१०) इति श्रुतिस्थपिबच्छब्दोदितशुभकर्मफलभोक्तारौ अत्मान्तरात्माख्यविष्णुरूपे एव न तु जीवेश्वरौ| कुतः? हि यस्मात्तौ गुहां प्रविष्टौ हृदयगुहां प्रविष्टौ तस्मादित्यर्थः | हिशब्देन हृदयगुहास्थितत्वलिङ्गस्य "यो वेद" (तै उ २-१) इति श्रुतिप्रसिद्धिं सूचयति | द्विरूपतया शरीरहृदयगुहास्थितत्वस्य तस्य "धर्मासमन्ता" (ऋ १०-११४-१) इति श्रुतावुक्तत्वादित्यर्थः ॥ 42 ॥**

**1-2-11. That entities residing in the space of *Hrudaya* in the context of enjoying the good fruits of *Karma* are the two special forms of *Brahma* viz., *Aatma* and *Antaraatma* and not *Jiva* and *Ishwara* because this meaning has been clearly indicated in the relevant *Shruti*. It is they who enjoy the good fruits of *Karma*. II 42 II**

## 1-2-12 II ॐ विशेषणाच्च ॐ II 43 II

**चः युक्तिसमुच्चये| "यः सेतुः" ( कठ १-३-२ ) इति एकवचनेन विशेषणादेक एव पाता स च सेतुत्वब्रह्मत्वादिना विशेषितत्वाद्विष्णुरेव न जीव इत्यर्थः।। 43 ॥**

**1-2-12. Further, suitable adjectives have been used in this context to bring out this meaning. II 43 II**

### II अन्तराधिकरणम् II 1-2-4 II

## 1-2-13 II ॐ अन्तर उपपत्तेः ॐ II 44 II

**"य एषोऽन्तरक्षिणि" इति श्रुत्युक्तोऽन्तरः | चक्षुरन्तःस्थितो विष्णुरेव नत्वग्निः | कुतः? उपपत्तेः एतदमृतत्वब्रह्मशब्दादीनां अन्तरे श्रवणात्| तेषां च विष्णावेवोपपत्तेरित्यर्थः II 44 II**

**1-2-13.The entity which enjoys the status of being inside the eyes is Lord *Brahma* and not *Agni*. Because the attributes** Amrutattwa and Abhayatwa **described here are applicable only to** *Brahma*. **II 44 II**

## 1-2-14 II ॐ स्थानादिव्यपदेशाच्च ॐ II 45 II

**ब्रह्मस्थानभूताक्षिशक्तेः तदधिष्ठातृ ब्रह्मशक्तेश्च | व्यपदेशात् "सर्पिर्वा उदकं वा सिञ्चति" (छा ४-१५-१) इक्तत्त्वाच्चक्षुरन्तस्थो विष्णुरेवेत्यर्थः II 45 II**

**1-2-14.The capabilities of the entity residing in the location of the eyes and also the location-specific attributes are both similar and they are both relevant for** *Brahman*.**II 45 II**

## 1-2-15 II ॐ सुखविशिष्टाभिधानादेव च ॐ II 46 II

**चः समुच्चये | सुखविशिष्टाभिधानात् | "कं ब्रह्मेत्यादि" (छ ४-१०) प्रकरणे विशिष्टसुखस्य पूर्णसुखस्याभिधानादेव चक्षुरन्तरो विष्णुरेव किमु "खं ब्रह्म" इति पूर्णज्ञानादपीत्यर्थः II 46 II**

**1-2-15. It is also explained that the entity residing in the sense organs has the attribute of possessing perfection and complete bliss and these are applicable only to the Supreme Lord. II 46 II**

1-2-16 ॥ ॐ श्रुतोपनिषत्कगत्यभिधानाच्च ॐ ॥ 47 ॥

**श्रुतोपनिषदां श्रुतमतध्यातैतद्विधानां पुंसाम् | केन वायुना | कयोः कार्यपरब्रह्मणोः | गतेः प्राप्तेः | "स एनान् ब्रह्म गमयति" इति " (छ ४-१५) श्रुतावभिधानाच्च चक्षुरन्तरो विष्णुरेवेत्यर्थः ॥ 47 ॥**

**1-2-16. For all those who have acquired the true learning of various *Vidyaas*, the ultimate destination is Lord *Brahma* through the support of *Vayu*. It is therefore, necessary that *Antara Vidya* should essentially refer to *Para Brahma Vidya* and not to** Agni Vidya. **II 47 II**

1-2-17 ॥ ॐ अनवस्थितेरसम्भवाच्च नेतरः ॐ ॥ 48 ॥

**इतरः अग्निः | चक्षुरन्तरो न किंतु विष्णुरेव | कुतः ? अनवस्थितेः जीवस्याग्नेर्जीवान्तरनियामकत्वे तस्यापि जीवत्वाविशेषात् तस्यापि नियामकान्तराभ्युपगमे तस्याप्येवमित्यनवस्थानात् | अग्न्यादिजीवस्य जीवान्तरनियामकत्वासम्भवाच्चेत्यर्थः ॥ 48 ॥**

**1-2-17. The entity residing inside the sense organs and controlling them cannot be *Agni*. Because *Agni* is a *Jiva* and it is under the control of another *Jiva* which again will have to be controlled by a third one and this leads to an *Anavasthaa* - unending chain. Further, it is impossible that one *Jiva* who is himself regulated can regulate others. Hence, we should accept that the Supreme Lord resides inside the sense organs. II 48 II**

**॥ अन्तर्याम्यधिकरणम् ॥ 1-2-5 ॥**

1-2-18 ॥ॐ अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात् ॐ॥ 49 ॥

**"एष आत्मान्तर्यामी" (बृ उप ५-७-३) इति श्रुत्युक्तोऽन्तर्यामी विष्णुरेव | न प्रधानादिः |कुतः ? अधिदैवादिषु अधिदैवाध्यात्माधिभूतादिप्रकरणेषु | तद्धर्मव्यपदेशात् तस्मिन् अन्तर्यामिणि | तस्य "यं पृथिवी न वेद" (बृ उप ५-७-३) इति श्रुतौ उक्तस्याविदितत्वादिब्रह्मधर्मस्य व्यपदेशात् उक्तत्वादित्यर्थः ॥ 49 ॥**

**1-2-18. In all the *Prakaranas* dealing with the Gods, (*Adhyaatma Vidya*) the entity residing in the different Gods and controlling them is the Supreme Lord *Brahma* only because the attributes relevant for Supreme Lord are described in those places. II 49 II**

1-2-19 II ॐ न च स्मार्तमतद्धर्माभिलापात् ॐ II 50 II

चः समुच्चये | स्मार्तकापिलस्मृत्युक्तम्| प्रधानं जीवश्च अन्तर्यामी न | कुतः? अतद्धर्माभिलापात् तद्धर्माणां प्रधानजीवधर्माणां त्रिगुणत्वसंसारित्वादीनाम् | अनभिलापत् अनुक्तत्वादित्यर्थः II 50 II

1.2.19. The inner motive force cannot be either *Pradhaana* or *Jiva*. Because their special attributes such as *Trigunatwa* (being bounded by three *gunas* viz. *Sattwa*, *Rajas*, and *Tamas*) and *Samsaarittwa* are not described in this. II 50 II

1-2-20 II ॐ शारीरश्चोभयेऽपि हि भेदेनैनमधीयते ॐ II 51 II

चः नञोऽनुकर्षणार्थः | हि यस्मात् | उभये माध्यन्दिनाः | काण्वाश्च "आत्मनोऽन्तरः विज्ञानादन्तरः" (बृ उप ५-७-११) इति | एवं जीवम् अन्तर्यामिणः सकाशाद्भिन्नत्वेनाधीयते पठन्ति | तस्माच्छारीरो जीवश्च नान्तर्यामीत्यर्थः II 51 II

1-2-20. Further, *Madhyaandinaas* and *Kanwaas* consider *Jiva* to be quite different from the entity which resides as an inner motive force. Hence the inner entity cannot be *Jiva*. II 51 II

II अदृश्यत्वाधिकरणम् II 1-2-6 II

1-2-21 II ॐ अदृष्यत्वादिगुणको धर्मोक्तेः ॐ II 52 II

अदृश्यत्वादिगुणकः "यत्तद्द्रेश्यम्" (मु १-१-६) इति श्रुत्युक्तादृश्यत्वादिधर्मविशिष्टाक्षरशब्दवाच्यो विष्णुरेव न प्रकृत्यादिः | कुतः? धर्मोक्तेः| ऋगादिपरविद्याविषयत्वरूपविष्णुधर्मस्य "यया" (मु १-१-५) इति श्रुत्युक्तत्वादित्यर्थः II 52 II

1-1-21. The entity having the attribute of being invisible and non-existent referred to by the word *Akshara* is the Lord *Brahma* himself and not *Prakruti*, *Chaturmukha Brahma* or *Rudra*. This is so, because, the special features of Supreme Lord *Brahma* such as being the subject matter of *Para Vidya* is also described here. II 52 II

1-2-22 II ॐ विशेषणभेदव्यपदेशाभ्यां च नेतरौ ॐ II 53 II

चः समुच्चये | इतरौ प्रकृतिद्वयम् | विरिञ्चिरुद्रौ च नादृश्यत्वादिगुणकौ | कुतः ? विशेषणभेदव्यपदेशाभ्याम् | प्रतिज्ञाद्वये क्रमेणैककहेत्वन्वयः | सार्वज्ञादिविशेषणात् | "तस्मादेतत्" (मु १-१-८) इति अदृश्यत्वादिगुणकाक्षराद्विरिञ्चरुद्रयोर्भेदोक्तेश्चेत्यर्थः II 53 II

**1-2-22.The *Chaturmukha Brahma* or *Rudra* cannot be the entity having the attribute of being invisible because such an entity is described to be *Sarvajna* - Omniscient- which cannot be the feature of *Chaturmukha Brahma* and *Rudra*. Further, the latter are clearly stated to be distinct from such an entity. II 53 II**

**1-2-23 II ॐ रूपोपन्यासाच्च ॐ II 54 II**

**"यदा पश्यः पश्यते" ( मु १-१-९) इति विष्ण्वसाधारणस्वर्णरूपप्रतिपादनाच्चादृश्यत्वादिगुणको विष्णुरेवेत्यर्थःII 54 II**

**1-2-23. Further, this entity is described to possess the luster of the gold whereas all other entities have a highly mixed appearance. II 54 II**

**II वैश्वानराधिकरणम् II 1-2- 7 II**

**1-2-24 II ॐ वैश्वानरः साधारणशब्दविशेषात् ॐ II 55 II**

**वैश्वानरः यस्त्वेतमित्यादि (छा ५-१८-१) वाक्यगतवैश्वानरादिशब्दवाच्यो विष्णुरेव | न त्वग्निः| कुतः? साधारणशब्दविशेषात् अग्नाविष्ण्वोः साधारणस्य वैश्वानरशब्दस्य "आत्मानं वैश्वानरं" इति श्रुतावात्मशब्देन विशेषितत्वादित्यर्थः II 55 II**

**1-2-24 55. The word *Vaishwaanara* having the characteristic of cooking everything (*Paachaka*) essentially refers to the Supreme Lord *Vishnu* and not to *Agni* because the word *Vaishwaanara* is further characterised by the word *Aatmaa* and the latter applies only to Lord *Vishnu*. II 55 II**

**1-2-25 II ॐ स्मर्यमाणमनुमानं स्यादिति ॐ II 56 II**

**इति स्मर्यमाणम् "अहं वैश्वानरो भूत्वा" ( भ गी १५-१४) इति स्मृत्युक्तं विष्णोर्वैश्वानरत्वम् , अनुमानं वैश्वानरविद्यायाः गीतोक्तभगवत्परत्वस्यानुमापकं स्यात् भवेदित्यर्थः II 56 II**

**1-2-25.We can infer that *Vishnu* alone is *Vaishwaanara*, because in the *Bhagavad Gitaa* Lord *Krishna* says that he himself takes the form of *Vaishwaanara*. II 56 II**

### 1-2-26 ll ॐ शब्दादिभ्योऽन्तःप्रतिष्ठानान्नेति चेन्न तथादृष्ट्युपदेशादसंभवात्पुरुषविधमपि चैनमधीयते ॐ ll 57 ll

**युक्तिसमुच्चये च शब्दः | शब्दादिभ्यः अग्निशब्दहोमाधिकरणत्वलिङ्गादित्यर्थः | अन्तःप्रतिष्ठानात् पाचकत्वेन शरीरान्तरवस्थानाच्च वैश्वानरो न विष्णुः किं तु अग्निरेवेति चेन्न | कुतः? तथा दृष्ट्युपदेशात् तथा अग्न्यादिनामलिङ्गकर्मवत्वेन दृष्ट्युपदेशात् उपासनोपदेशादित्यर्थः | तथाच अग्न्यादिश्रुतिलिङ्गानां विष्णौ सावकाशत्वान्न तद्विरोध इति भावः | किञ्चात्रोक्तात्मत्वब्रह्मत्वादीनां अग्न्यादावसम्भवाच्च वैश्वानरो विष्णुरेव | अपि च यतः छन्दोगाः एवं वैश्वानरं पुरुषविधं पुरुषसूक्तप्रतिपाद्य नारायणसमानगुणकमेवाधीयतेऽभिदधति | अतोऽपि विष्णुरेवेत्यर्थः |च शब्देन पुरुषसूक्तस्य विष्णुपरत्वं बहुप्रमाणसिद्धमिति सूचितम् ll 57 ll**

**1-2-26. From the word such as *Agni* and also from the attributes such as *Paachakatwa*, *Homaadyaad-haratwa*, *Gaarhapatyaangakatwa*, etc., we cannot argue that *Vaishwaanara* cannot mean *Brahma* because words like *Agni* and the attributes of *Paachakatwa* etc. have been presented to facilitate *Upaasana*. Further, the use of word *Aatma* and also the fact that it is *Parabrahma Prakarana* confirm that the word *Vaishwaanara* should meanLord *Vishnu* only. *Chaandogya Shruti* describes *Vaishwaanara* to have the attributes of *Purusha* who is well explained in the *Purusha Sukta*. ll 57 ll**

### 1-2-27 ll ॐ अत एव न देवता भूतं च ॐ ll 58 ll

**देवता अग्न्यादिरूपा | भूतं तदभिमन्यमानतेजोभूतं च वैश्वानरशब्दवाच्यं न | कुतः? अत एव निरवकाशात्मशब्दादिहेतोरेवेत्यर्थः ll 58 ll**

**1-2-27. The word *Vaishwaanara* does not refer to *Agni* or the *Tejas* (one of the five elements) for the same reasons that there is word *Aatma*. ll 58 ll**

### 1-2-28 ll ॐ साक्षादप्यविरोधं जैमिनिः ॐ ll 59 ll

**साक्षात् मुख्यवृत्या | अपि ब्रह्मणोऽग्न्यादिशब्दवाच्यत्वेऽपि अविरोधम् अज्ञानादिनिमित्तान्तरेण अग्न्यादौ तत्तच्छब्दविरोधाभावं जैमिनिराचार्यो वक्तीत्यर्थः ll 59 ll**

**1-2-28. *Jaimini* acharya clearly believes that the terms such as *Agni* refer to Lord *Vishnu* through *Mukhya Vrutti* and that this approach does not create difficulties in using the word *Agni* in the normal life to mean jada fire. ll 59 ll**

1-2-29 ॥ ॐ अभिव्यक्तेरित्याश्मरथ्यः ॐ ॥ 60 ॥

अभिव्यक्तेः अग्न्यादिषु ब्रह्मोपास्तौ कृतायां तेषु ब्रह्मणोऽभिव्यक्तेः| तन्निमित्तोऽग्न्यादिसूक्तनियम इति आश्मरथ्याचार्यो मन्यत इत्यर्थः॥ 60 ॥

1-2-29. Sage *Ashmarathya* believes that when we perform *Upaasana* of Lord *Brahman* in the *Agni Suktas*, we realise Lord *Brahman* who manifests himself and hence there is no conflict in interpreting *Agni* to mean Lord *Brahma*. ॥ 60 ॥

1-2-30 ॥ ॐ अनुस्मृतेर्बादरिः ॐ ॥ 61 ॥

अनुस्मृतेः तत्तत्सूक्ताध्युपासकैरग्न्यादिष्वेव ब्रह्मणोऽनुस्मृतेः अनुसन्धानात् हेतोः अग्न्यादिसूक्तव्यवस्थेति बादरिर्वक्तीत्यर्थः॥ 61 ॥

1-2-30. Sage *Baadari* states that we remember the Supreme Lord even while performing *Upaasana* with *Agni Sukta*. ॥ 61 ॥

1-2-31 ॥ ॐ संपत्तेरिति जैमिनिस्तथा हि दर्शयति ॐ ॥ 62 ॥

हि यस्मात् | "तं यथा" इति हि प्रसिद्धा श्रुतिः तथा दर्शयति यथा जैमिनिमतं तथा प्रतिपादयति| तस्माज्जैमिनिः स्वोक्त्यनुकूल श्रुत्यनुसारेण | संपत्तेः अग्न्यादिसूक्तोपासकानामग्न्यादिप्राप्तिहेतोस्तद्विवक्षया सूक्तादिनियम इत्याहेत्यर्थः॥ 62 ॥

1-2-31. Sage *Jaimini* argues that by doing *Upaasana* of *Brahman* with *Agni Sukta* we realize *Agni*. *Shruti* says that you realise that which you worship. ॥ 62 ॥

1-2-32 ॥ ॐ आमनन्ति चैनमस्मिन् ॐ ॥ 63 ॥

चः शङ्कानिवर्तकः | यस्मात् एवं विष्णुम्| अग्न्यादावामनन्ति| तत्स्थतया "योऽग्नौ तिष्ठन्" ( बृ ५-७-५) इत्याद्याः श्रुतयः प्रतिपादयन्ति | तस्मात् कथमग्न्यादिषु विष्णूपास्त्या अग्न्यादिप्राप्तिर्भवतीति शङ्का निवृत्ता | कुतः? अग्न्यादिपदेन तत्स्थभगवत्प्राप्तेरेवाभिप्रेतत्वादित्यर्थः ॥ 63 ॥

**1-2-32. The *Shrutis* consider that Lord *Vishnu* resides inside *Agni*, *Varuna* etc., as their controlling force and hence the different *Suktaas* being called as *Agni Sukta*, *Varuna sukta etc* can be justified. II 63 II**

**II इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रेषु श्री जगन्नाथयतिकृतायां सूत्रदीपिकायां प्रथमाध्यायस्य द्वितीयः पादः II**

# श्री कृष्णद्वैपायन कृत ब्रह्मसूत्राणि
# श्री जगन्नाथयतिकृत सूत्रदीपिका सहितानि ।

|श्री मद्धहनुमभीममध्वांतर्गत रामकृष्ण वेदव्यासात्मकश्रीलक्ष्मीहयग्रीवायनमः |

॥ हरिः ॐ ॥

कृष्णं रामं नरसिंहं व्यासं नत्वा गुरुनपि ।
जगन्नाथाख्य यतिना क्रियते सूत्रदीपिका ॥

## ॥ प्रथमाध्यायः (समन्वयाध्यायः)॥

## तृतीय पादः (उभयत्रप्रसिद्धलिङ्गात्मकशब्दसमन्वयपादः)

### ॥ ध्युभ्वाद्यधिकरणम् ॥ 1.3.1 ॥

**1.3.1 ॥ ॐ ध्युभ्वाद्यायतनं स्वशब्दात् ॐ ॥ 64॥**

**1.3.1. ध्युभ्वाद्यायतनं "यस्मिन्" (मुं २-२-५) इति वाक्योक्तस्वर्गभूम्यादिसर्वाश्रयो विष्णुरेव नत्वन्यः | कुतः? स्वशब्दात् स्वेतिशब्दः स्वशब्दः स्वशब्दगृहीतब्रह्मवाचकात्मशब्दादित्यर्थः ॥ 64 ॥**

**1.3.1. Lord *Vishnu* is the only resort for all the worlds like earth, heaven etc., because the world '*Swa*' has been used in the relevant *Shrutis* and *Swa* means *Atma* which in turn means *Brahman*. ॥ 64॥**

**1.3.2.| | ॐ मुक्तोपसृप्यव्यपदेशात् ॐ ॥ 65॥**

**1.3.2. ध्युभ्वाद्यायतनं न विष्णोरन्यः | किं तु विष्णुरेव | कुतः? मुक्तोपसृप्यव्यपदेशात् | भावप्रधानोऽयम् | ध्युभ्वाद्यायतनस्य वस्तुनो "अमृतस्यैष सेतुः" इति मुक्तप्राप्यत्ववचनात्तस्य चान्यत्रायोगादित्यर्थः ॥ 65 ॥**

**1.3.2. The Resort for all worlds like earth, heaven etc. is *Vishnu* also because it is proclaimed in the *Shrutis* that such Resort is final destination of all the *Muktas* and this characteristic applies only to *Vishnu*. ॥ 65 ॥**

1.3.3 II ॐ नानुमानमतच्छब्दात् ॐ II 66II

1.3.3 अनुमानम् आनुमानमिति वा | अनुमानसिद्धप्रामाण्ययुतपाशुपताद्यागमैः सर्वाश्रयतया कल्पितं रुद्रप्रधानादिकं ध्युभ्वाद्यायतनं न | कुतः? अतच्छब्दात् भस्मधरोग्रत्वादितच्छ्रुतिलिङ्गाद्यभावादित्यर्थः II 66 II

1.3.3 *Rudra* and *Pradhana* derived by means of deductive logic (*Anumana*) cannot be the Resort of all worlds, because the features (terms) of *Rudra* such as smearing *Bhasma*, or being ferocious and those of *Pradhana* such as being the origin for three *Gunas*, are not described in the relevant *Shrutis*. II 66 II

1.3.4 II ॐ प्राणभृच्च ॐ II 67II

1.3.4 जीवोऽप्यत एव न ध्युभ्वाद्यायतनमित्यर्थः II 67 II

1.3.4 *Jiva* or *Vayu* cannot be the resort of all worlds because of the same reasons given earlier viz. use of the word *Atma*, being the final destination of all *Muktas*, and not including the terms and features of others II 67II

1.3.5 II ॐ भेदव्यपदेशात् ॐ II 68II

1.3.5 "अन्यमीशम्" इति जीवेशयोर्भेदोक्तेः न तयोरैक्यमित्यर्थः II 68 II

1.3.5 In the *Shruti* "*Anyameesham*", the distinction between *Jiva* and *Isha* is clearly brought out and hence *Jiva* cannot be the Resort of all the worlds II 68II

1.3.6 II ॐ प्रकरणात् ॐ II 69II

1.3.6 "अनश्नन्नन्यो" (मु ३-१-१) इत्यादेर्विष्णुप्रकरणत्वात् | अत्र जीवस्य विष्णुभेद एवोच्यते | नत्वन्यस्माद्भेद इत्यर्थः II 69 II

1.3.6 Since we are dealing with the *Vishnu Prakarana* in *Mundaka*, the word *Isha* refers to *Vishnu* only and as such the term '*Anya*' signifies the distinction between *Jiva* and *Vishnu II* 69II

-

1.3.7 II ॐ स्थित्यदनाभ्याञ्च ॐ II 70II

**1.3.7 ईशजीवयोः "द्वासुपर्णा" (मु ३-१-१) इत्यादिवाक्योक्तं कर्मफलानुपजीवनस्थितितदुपजीवनरूपहेतुभ्यां न च तयोरैक्यं वाच्यमित्यर्थः II 70 II**

**1.3.7 *Jiva* and *Isha* are different entities because in various *Shrutis*, *Isha* is described to be existing without dependence on the fruits of deeds (*Sthiti*) (*Karmaphala*) and *Jiva* is described to be dependent on the effect of deeds (*Adana*) II 70II**

## | | भूमाधिकरणम् II 1.3.2 II

1.3.8 II ॐ भूमा संप्रसादाध्युपदेशात् ॐ II 71II

**1.3.8 भूमा "यो वै भूमा ( छां - ७-१-३) इति श्रुतौ भूमशब्दोक्तपूर्णो विष्णुरेव | कुतः? संप्रसादात् भूम्नस्तत्सुखमित्यनेन संप्रसादशब्दितपूर्णसुखरूपत्वाभिधानात् | किञ्च अध्युपदेशात् नामादेरपि तदुपरि नामादिदेवतोत्तमत्वेन भूम्नोऽभिधानाच्चेत्यर्थः II 71 II**

**1.3.8 The word *Bhuma* used in *Shruti*, meaning complete or full, refers to *Vishnu* only because such a complete entity is described to be one with Perfect Bliss and superior to everybody and these features apply only to Lord *Vishnu*. II 71 II**

1.3.9 II ॐ धर्मोपपत्तेश्च ॐ II 72II

**1.3.9 "स एवाधस्तात्" (छां ७-२५-१) इत्यादिना भूम्नि सर्वगतत्वादिधर्मश्रवणात् | तस्य च विष्णुरेवोपपत्तेः विष्णुरेव भूमेत्यर्थः II 72 II**

**1.3.9 The term *Bhuma* refers to *Vishnu* only, because the features like All-Pervasiveness, Resort to all, are described and these are applicable only to Lord *Vishnu.II* 72| |**

## | | अक्षराधिकरणम् II 1.3.3 II

### 1.3.10 II ॐ अक्षरमम्बरान्तधृतेः ॐ II 73 II

**1.3.10 अक्षरं "तद्वा एतत्" इत्यक्षरशब्दवाच्यं ब्रह्मैव न चित्प्रकृतिः | कुतः? अम्बरान्तधृतेः अस्मिन्नक्षरे "एतस्मिन्खल्वक्षरे" (बृ ५-८-११) इति आकाशान्तपदार्थधारकत्वश्रवणादित्यर्थः II 73 II**

**1.3.10 The word *"Akshara"* appearing in the *Shruti* refers to the Lord *Brahman* and not to *Shritattwa*, because it is described in the same *Shruti* that all entities which have *Shritattwa* i.e. *Chit-Prakriti* called *Akaasha* as their final Resort, are also all ultimately held by *Akshara* and this applies to only to Supreme Lord *Vishnu* himself. II 73 II**

### 1.3.11 II ॐ सा च प्रशासनात् ॐ II 74 II

**1.3.11 चो यतः | सा अम्बरान्तधृतिः | प्रशासनात् विष्णोराज्ञामात्रादेव भवतीति "एतस्यवा" (बृ ५-८-९) इति श्रुतावुक्ता | अतोऽपि ब्रह्मैवाक्षरशब्दवाच्यम् | न चेतनप्रकृतिरित्यर्थः II 74 II**

**1.3.11 *Akshara* is *Vishnu* only because the phenomenon of holding all the entities up to *Akaasha*, takes place through the command of Lord *Vishnu*. II 74 II**

### 1.3.12 II ॐ अन्यभावव्यावृत्तेश्च ॐ II 75II

**1.3.12 अन्यभावानां विष्ण्वन्यवस्तुस्वभावानां स्थूलत्वादीनाम् अस्थूलमनण्विति श्रुतावक्षरे व्यावृत्तेरभावस्य कथनाच्च ब्रह्मैवाक्षरमित्यर्थः II 75 II**

**1.3.12 The word *Akshara* refers to Lord *Vishnu* because the features relevant for the other *Prakritika* objects, such as *Sthoulya* (massiveness), etc., are negated for *Akshara* and *Non-Prakritika* features are applicable only to Lord *Vishnu*. II 75 II**

## II सदधिकरणम् II 1.3.4 II

### 1.3.13 II ॐ ईक्षतिकर्मव्यपदेशात्सः ॐ II 76 II

**1.3.13 "सदेव" इत्यादि (छां - ६-२-१ ) प्रकरणस्थितसदादिशब्दवाच्चः विष्णुरेव न प्रधानम् | कुतः:? ईक्षतिकर्मव्यपदेशात् | "तदैक्षत" (छां - ६-२-३ ) इति चेतननिष्ठैक्षतेतिशब्दोपलक्षितदर्शनाख्यक्रियाभिधानादित्यर्थः II 76 II**

**1.3.13 The word "*Sat*" used in the *Shruti* (*Sat Eva Soumya* etc.) means Lord *Brahma* because it is described that *Sat* is the one who perceives everything and this feature is applicable to Lord *Vishnu* himself and not to *Jada* object. II 76 II**

**॥ दहराधिकरणम् ॥ 1.3.5 ॥**

**1.3.14 ॥ ॐ दहर उत्तरेभ्यः ॐ ॥ 77 ॥**

**1.3.14 दहरे "दहरं पुण्डरीकं वेश्म" इति वाक्योक्तहृत्पद्मस्थाल्पाकाशे स्थितो विष्णुरेव न तु जीवादिः | कुतः? उत्तरेभ्यः " य आत्माऽपहतपाप्मा" (छां ८-७) इत्याद्युत्तरवाक्योक्तनिर्गतपाप्मत्वादिधर्मेभ्य इत्यर्थः॥ 77 ॥**

**1.3.14 The entity described as the one residing inside the limited space of *Hrudaya*(heart) is Lord *Vishnu* and not *Jiva* because in the later portion of the *Shruti* the features such as being free from all sins and evils is attributed to such an inner entity and these are applicable to Lord *Vishnu* only. II 77 II**

**1.3.15 ॥ ॐ गतिशब्दाभ्यां तथाहि दृष्टं लिङ्गं च ॐ ॥ 78 ॥**

**1.3.15 गतिशब्दाभ्यां "अहरहर्गच्छन्त्य एतं ब्रह्मलोकम्" (छां ८-३-२) इति वाक्ये श्रुताभ्यां सुप्तप्राप्यत्वब्रह्मशब्दाभ्यां हेतुभ्यां दहरपद्मस्थं ब्रह्मैव | किं च यतः "अरश्च " (छां -८-५-३) इति श्रुतौ तथा सुप्तप्राप्यत्ववत् | हि विष्णुनिष्ठत्वेन प्रसिद्धं लिङ्गम् अरण्याख्यसुधासमुद्राश्रयलोकवत्त्वरूपज्ञापकम् | हृत्पद्मस्थे दृष्टम् उक्तम् | अतोऽपि दहरपद्मस्थो विष्णुरेवेत्यर्थः ॥ 78 ॥**

**1.3.15The entity described as residing inside the heart is Lord *Vishnu* himself because *Daharastha* is described to be one who is reached by all in the state of deep sleep (*Sushupti Avastha*) and also the word *Brahma* is used in the same context. Further the feature of residing in the *Vishnu Loka* which is held by the nectar-ocean called "*Aranya*" has been attributed to "*Daharastha*". II 78 II**

**1.3.16 ॥ ॐ धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धेः ॐ ॥ 79 ॥**

**1.3.16 धृतेः "स एष सेतुर्विधृतिः" ( छां ८-४) इत हृत्पद्मस्थस्य सर्वाधारत्वश्रवणाच्च विष्णुरेव हृत्पद्मस्थः | किं च छान्दोग्ये हृत्पद्मस्थनिष्ठतयोक्तस्य महिम्नः सर्वेश्वरत्वादेः अस्मिन् एष सर्वेश्वर इति वाजसनेयकवाक्ये | उपलब्धेः | श्रवणात् |तत्समाख्यानादपि विष्णुरेव हृत्पद्मस्थः | ननु**

**समाख्यानादपि कुतो विष्णुरेवेत्यत उक्तम् | अस्येत्यादि |अस्य विष्णुमहिम्नः | अस्मिन् वाजसनेयकवाक्ये श्रवणादेवेत्यर्थः II 79 II**

**1.3.16 The entity residing inside the lotus-like heart is Lord *Vishnu* himself, because the features of being Resort to all, the greatness of being Supreme to everybody, being free from all blemishes etc., are described in the *Vaajasaneya Shruti*. Such corroborative evidence confirms that *Daharastha* is Lord *Vishnu* himself. II 79 II**

**1.3.17 II ॐ प्रसिद्धेश्च ॐ II 80II**

**"दहरं विपाप्मम्" (महा, ना १०-७) इति श्रुतौ विष्णोः हृत्पद्मस्थत्वप्रसिद्धेश्च स एव हृत्पद्मस्थ इत्यर्थः II 80 II**

**1.3.17 In the *Taittiriya Shruti*, it is well known that *Vishnu* is described as the entity residing inside the lotus-like heart. II 80 II**

**1.3.18 II ॐ इतरपरामर्शात्स इति चेन्नासम्भवात् ॐ II 81 II**

**1.3.18 इतरपरामर्शात् "स्वेन रूपेणाभिनिष्पद्यते" ( छां ८-१२-३) इत्युक्तस्य जीवस्य हृत्पद्मस्थात्मतया "एष आत्मा" (छां ४-१५-१) इत्येतच्छब्देन परामर्शात् ग्रहणात् | जीव एव हृत्पद्मस्थ इति चेन्न | कुतः? असम्भवात् | हृत्पद्मस्थनिष्ठतया श्रुतानामपहतपाप्मत्वादिगुणानां जीवे स्वातन्त्र्येणासम्भवादित्यर्थः II 81 II**

**1.3.18 We cannot argue that since *Jiva* is referred to by the word "*Etat*" appearing in the relevant** Shruti, Daharastha **will have to be *JIva*, because the features like being free from all blemishes and being *Amruta*, *Abhaya* attributed to the *Hrutpadmastha*-Entity residing inside the heart are not applicable to anybody other than Lord** *Vishnu*. **II 81II**

**1.3.19 II ॐ उत्तराच्चेदाविर्भूतस्वरूपस्तु ॐ II 82 II**

**1.3.19 तुशब्द एवार्थे | नेति शेषः | तथा च उत्तरात् | "स तत्रपर्येति" (छां ८-१२-३) इत्युत्तरवाक्यात् | जीवस्य सत्यकामत्वादिप्रतीतेः|तत एव विशोकत्वादेः सम्भवात् | स एव हृत्पद्मस्थ इति चेन्न | कुतः?**

**यतस्तद्वाक्ये “स्वेन" इत्युत्तरवाक्यबलात् आविर्भूतस्वरूपो मुक्त एव प्रतिपाद्यः | न जीवमात्रम् | मुक्तश्च न स्वतोऽपहतपाप्मत्वादिगुणकः | अतो न तस्यापि हृत्पद्मस्थत्वमित्यर्थः ॥ 82 ॥**

**1.3.19 We cannot argue that in the later portion *Jiva* is inferred to be free from all blemishes and sins and hence *Jiva* could be the entity residing inside the lotus-like heart because the entity referred to as "*Satyakama*" in the relevant *Shruti* is emancipated soul which has realised its pure form. However, such entity residing within the lotus-like heart cannot be such an emancipated soul, since such a soul cannot be bound by the body formed by *Prakriti*. II 82 II**

**1.3.20 ॥ ॐ अन्यार्थश्चपरामर्शः ॐ ॥ 83 ॥**

**1.3.20 चः एवार्थे | परामर्शः “एष आत्मा " इति वाक्यगतैतच्छब्दः अन्यार्थः “परञ्ज्योतिः” इत्युक्तपरमात्मार्थ एव न जीवार्थ इत्यर्थः ॥ 83 ॥**

**1.3.20 Further, the entity deduced in the present contexts is the Lord *Brahma* in the form of *Jyotish* or lustre and this is described as *Atman*. II 83 II**

**1.3.21 ॥ ॐ अल्पश्रुतेरिति चेत्तदुक्तम् ॐ ॥ 84॥**

**1.3.21 अल्पश्रुतेः “दहरः” इत्यल्पस्थानस्थितत्वोक्तेः | जीव एव हृत्पद्मस्थ इति चेत् | नेति शेषः | कुतः? यतस्तदुक्तं तत्तु अल्पस्थानस्थितत्वम् उक्तं निचाय्यत्वादेवमित्यत्र व्याप्तस्यापि विष्णोः उपासनार्थमुच्यत इत्युक्तं आत्मान्तरहृदय इति श्रुत्युक्तं च अत इत्यर्थः ॥ 84 ॥**

**1.3.21 We cannot argue that since the space available in the heart is very small, the entity residing in the lotus-like heart cannot be the Lord *Brahma*. It is already explained that the feature of residing in a small space is specially meant to facilitate meditation (*Upaasana*) and further, to recognise that even a small portion of Lord *Vishnu* is perfect and Omnipotent like the whole. II 84II**

## ॥ अनुकृत्यधिकरणम् ॥ 1.3.6 ॥

### 1.3.22 ॐ अनुकृतेस्तस्य च ॐ ॥ 85 ॥

**1.3.22 चः समुच्चये | तस्येति शृतिप्रतीकग्रहणम् | अनुकृतिरनुक्रिया | तथाच "कथं नु तद्विजानीयाम्" (कठ २-२-१४) इति ज्ञानार्थं प्रार्थिततत्वरूपानुकूल्येन गृह्यमाणं ब्रह्मैव | कुतः? अनुकृतेः | "तमेव भान्तमनुभाति सर्वम्" (कठ २-२-१५) इति वाक्यशेषे सूर्यादीनां भगवत्क्रियानुसारिप्रकाशाख्यक्रिया कर्तृत्वश्रवणात् | "तस्य भासा सर्वमिदं विभाति" (कठ २-२-१५) इति जगतः परमात्मप्रभाप्रकाश्यत्वश्रुतेश्चेत्यर्थः ॥ 85 ॥**

**1.3.22 The entity described as imponderable and indescribable in the *Shrutis* is Lord *Brahman* himself and not the bliss of the *Jnaanis* because later in the same *Shruti*, this entity is described to be such that it is reflected in the form of Sun who derives his shining capacity only from the Supreme Lord *Vishnu*. The bliss of *Jnaani* does not have this feature. II 85 II**

### 1.3.23 ॥ ॐ अपि स्मर्यते ॐ ॥ 86॥

**1.3.23 न केवलं हेतुकृतानुकूल्यादेर्विष्णुधर्मत्वं श्रूयते किं तु कृष्णादिभिः "यदादित्यगतं तेजो" (भ गीता १५-१२) इत्यादि स्मृत्यादिषूच्यतइत्यर्थः ॥ 86 ॥**

**1.3.23 Further, the fact that the shining capacity of the Sun is derived from Supreme Lord *Vishnu* is corroborated not only by *Shrutis* but also by statements contained in many *Smritis* such as *Bhagavad Gita.II 86II***

## ॥ वामनाधिकरणम् ॥ 1.3.7 ॥

### 1.3.24 ॥ ॐ शब्दादेव प्रमितः ॐ ॥ 87 ॥

**1.3.24 विष्णुरेव "ईशानो भूतभव्यस्य" (कठ २-१-१२)_ इति ईशानशब्दवाच्यत्वेन प्रमितः | तत्त्वतो निश्चितः | न तु वायुः | कुतः? शब्दादेव | "मध्ये वामनम्" (कठ - 2-२-३) इति निरवकाशवामनश्रुतेरेवेत्यर्थः ॥ 87 ॥**

1.3.24 The word "*Ishaana*" essentially refers to Lord *Brahma* and not to *Vaayu* because the word *Vaamana* appearing in the same *Shruti*, means Lord *Vishnu* without any scope for double meaning (*Niravakaasha*). II 87 II

1.3.25 ॥ ॐ हृद्यपेक्षया तु मनुष्याधिकारत्वात् ॐ ॥ 88 ॥

1.3.25 तु शब्द एवार्थे | अपिशब्दार्थे च | तथा च सर्वगतस्यापि विष्णोः अङ्गुष्ठमात्रत्वोक्तिः हृद्यपेक्षया अङ्गुष्ठपरिमितहृद्याकाशापेक्षयैव | न तावता विष्णोः परिच्छिन्नत्वं ज्ञेयमित्यर्थः | ननु पश्वादीनामङ्गुष्ठाभावात्कथं तन्मात्रत्ववचनं सर्वाधिकारिकमित्यत उक्तम् | मनुष्याधिकारत्वादिति | तथा चैतद्विद्योपासनस्य मनुष्याधिकारिकत्वात् | तान्प्रत्येतद्विद्याप्रवृत्तिसम्भवात् | पश्वादीनामङ्गुष्ठाभावेऽपि न दोष इति भावः ॥ 88 ॥

1.3.25 The entity referred to as "*Ishaana*" is described to be residing in the space of the heart which is limited to be of the sixth of a thumb. This description is meant only for facilitating the *Upaasana* by the human beings while other being like animals etc. are not eligible for *Upaasana*. II 88| |

## ॥ देवताधिकरणम् ॥ 1.3.8 ॥

1.3.26 ॥ ॐ तदुपर्यपि बादरायणः सम्भवात् ॐ ॥ 89 ॥

1.3.26 तदुपर्यपि देवत्वयोग्यमनुष्याणां न केवलं मनुष्यत्वदशायां किंतु देवादित्वप्राप्त्यनन्तरमपि वेदविद्याधिकारोऽस्ति | कुतः? सम्भवात् तेषामप्यधिकारप्रयोजकविशिष्टबुध्यादेर्योगादिति बादरायणो भगवान्वक्तीत्यर्थः ॥ 89 ॥

1.3.26 *Baadaraayana* opines that it is not only the human beings but also the divine entities who are obviously above the human beings, that are entitled to perform *Upaasana*, acquire knowledge and perform deeds because they have all the faculties such as special intellect required for this purpose. II 89 II

1.3.27 ॥ ॐ विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात् ॐ ॥ 90 ॥

1.3.27 देवादीनां सादित्वे कर्मणि पूर्वकल्पे प्रवृत्तयज्ञादिकर्मणि विषये | विरोधः उद्येश्याभावानिमित्तवैयर्थ्याख्यविरोधः | स्यादिति चेन्न | कुतः? अनेकप्रतिपत्तेः | अनेकेषां योग्यमनुष्याणां देवतापदप्राप्तेर्दर्शनात् | "यत्र पूर्वे" (तै आ ३-१२) इति श्रुतावुक्तत्वादित्यर्थः ॥ 90 ॥

**1.3.27 The state of subordinate Gods can be attained by the eligible human beings through special deeds and *Yajnaas*. But if in the very early stage nobody had attained this state, then the question is whom did the deeds and *Yajnaas* be addressed to. Without anybody in the seat of particular Gods, the deeds to be performed by human beings, addressed to the Gods may have to be regarded as futile. We cannot argue like this because at any stage someone or the other would have attained some status of Godhood in the hierarchy of Gods. II 90 II**

**1.3.28 ॥ ॐ शब्द इति चेन्नातः प्रभावात्प्रत्यक्षानुमानाभ्याम् ॐ ॥ 91॥**

**1.3.28 विरोध इति वर्तते | देवानामाद्यन्तवत्त्वे शब्दे वेदे अप्रामाण्याख्यविरोधः स्यान्नित्यत्वेन श्रुतिसिद्धवेदवाचाम् | कदाचिद्वाच्यहीनत्वादिति भाव इति चेन्न | अतः "धाता यथा" (महा ना ५-७) इति वेदवाक्यात् | तथा प्रत्यक्षानुमानाभ्याम् | महतां प्रत्यक्षात् | देवानां प्रवाहतः उत्पत्तिसाधकलिङ्गाच्च | प्रभवात् प्रतिकल्पम् | नियमेन प्रभवशब्दितोत्पत्त्यवगमाच्च उक्तं युक्तमिति भावः ॥ 91 ॥**

**1.3.28 One may argue that at some time there won't be any Gods, and as such *Vedas* would be addressing to some non-existent entities, and that statements made in the *Vedas* are futile and baseless. This is not correct. That the Gods are continually existent is confirmed by the statements available in the *Vedas*, by the clear perception of the great men and also by the use of deductive logic. II 91 II**

**1.3.29 ॥ ॐ अत एवच नित्यत्वम् ॐ ॥ 92 ॥**

**1.3.29 अत एव पूर्वपक्ष्युक्तवेदनित्यत्वादेव तदन्यथाऽनुपपत्यापि तद्वाच्यदेवप्रवाहस्य नित्यत्वं सिध्यतीत्यर्थः ॥ 92 ॥**

**1.3.29 Since the *Shabdaas* (words) are eternal, the continuity of Gods explained in the *Vedas* has also to be accepted as eternal. II 92 II**

**1.3.30 ॥ ॐ समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात्स्मृतेश्च ॐ ॥ 93 ॥**

**1.3.30 अवृत्तावपि पूर्वकल्पे मुक्तानां देवानां पुनः स्वपदेषु असत्वेऽपि | अविरोधः तत्प्रतिपादकैकविधवेदाप्रामाण्याख्यविरोधो नास्ति | कुतः? समाननामरूपत्वात् एतत्कल्पोत्पन्नानामपि देवानां प्राचीनतुल्यनामरूपत्वात् | तथा च प्रतिपाद्यस्याप्येकविधत्वात् न**

**तद्बोधकवेदाप्रामाण्यामिति भावः | एकविधत्वमेव कुत इत्यत उक्तम् | दर्शनात्स्मृतेश्चेति | "यथा पूर्वम् (महा ना ५-७) इति श्रुतेः | "अनादिनिधन" (विष्णु सहस्रनाम) इति स्मृतेश्चेत्यर्थः ॥ 93 ॥**

**1.3.30 Even though those who occupy some positions of the Gods get emancipated in due course of time, there would be many others who take their turn to occupy those positions and possess the same names and same characteristics. Hence, the statements made in the *Vedas* cannot be regarded as baseless and untrue, there are many statements in the *Shrutis* and in the *Smritis* which corroborate these points. II 93II**

**1.3.31 ॥ ॐ मध्वादिष्वसम्भवादनधिकारं जैमिनिः ॐ ॥ 94 ॥**

**1.3.31 मध्वादिषु "असौ वा आदित्यो देवमधु" ( छां ३-१-१) इत्याध्युक्तमध्वादिविद्यासु | अनधिकारं देवानामधिकाराभावम् | जैमिनिराचार्यो मन्यते | कुतः? असम्भवात् तेषामर्थित्वतत्पदयोग्यत्वाद्ययोगादित्यर्थः ॥ 94 ॥**

**1.3.31 *Jaimini* believes that in regard to some lores (*Vidyas*) like *Madhu Vidya, Jyotishtamo Vidya*, Gods do not have the eligibility because Gods do not aspire for fruits which can be achieved by such lores. II 94 II**

**1.3.32 ॥ ॐ ज्योतिषि भावाच्च ॐ ॥ 95 ॥**

**1.3.32 ज्योतिषि देवानां ज्ञाने भावात् सर्ववस्तूनां विषयतयाऽन्तर्भूतत्वात् | सिद्धज्ञानानां देवानां न ज्ञानार्थिता युज्जत इति न मोक्षविद्यास्वप्यधिकार इत्यर्थः ॥ 95 ॥**

**1.3.32 *Jaimini* also holds the view that the Gods who have already acquired the knowledge of all the objects are not eligible for the acquisition of further knowledge which is instrumental for achieving *Moksha*. The presumption here is that the Gods who have the knowledge would have also acquired the knowledge relevant for achieving *Moksha* and hence there is no need for acquiring further knowledge. II 95 II**

1.3.33 II ॐ भावं तु बादरायणोऽस्ति हि ॐ II 96II

**1.3.33 हि यस्मात् | देवानामप्यस्ति विद्यासाध्यापूर्वप्रकाशविशेषो मोक्षफले अतिशयश्चास्ति | तस्माद्भावं देवानामधिकारसद्भावं मन्यत इत्यर्थः | जैमिनिमतं तु देवानां प्राप्तज्ञानफलार्थमनधिकाराभिप्रायमित्यवधेयम् II 96 II**

**1.3.33 On the contrary, *Baadaraayana* holds the view that even Gods, who have acquired knowledge, have eligibility to the lores such as *Madhu Vidya*. *Jyotishtamo Vidya* and also further knowledge. He believes that by such knowledge, Gods would be able to realise some special exuberance in their Bliss in the *Moksha*. There is no conflict between the views of *Jaimini* and those of *Baadaraayana* because *Jaimini* refers to the knowledge and to the fruit acquired there from, in which Gods do not have interest. II 96 II**

II अपशूद्राधिकरणम् II 1.3.9 II

1.3.34 II ॐ शुगस्य तदनादरश्रवणात्तदाद्रवणात्सूच्यते हि ॐ II 97II

**1.3.34 अस्य पौत्रायणाख्यस्य राज्ञः तदनादरश्रवणात् हंसकृतस्य "कम्वर एनम्" (छां ४-१-३) इत्यनादरश्रवणान्निमित्तात् | शुक्शोकः | तथापि कुतः शोक? इत्यत उक्तम् | सूच्यते हीति | हि यस्मात् | "स ह सञ्जिहान एव" ( छां ४-१-५) इत्युत्तरवाक्येन सूच्यते तथा ज्ञायते | तस्माच्छोकः अस्मादेव निमित्तात् | राज रैक्केण ऋषिणा शूद्रेति सम्बोधितः | न तु वर्णवरत्वाभिप्रायेणेत्यर्थः | तथा च नैतज्ज्ञापकबलेन शूद्रस्य वेदविद्याधिकारो मन्तव्य इति भावः II 97 II**

**1.3.34 *Shudras* do not have eligibility in the *Vedic* lores. Further, it should be noted in the context of the conversation between Raikwamuni *and* pautraayana *Raja*, the word *Shudra* is used not in the sense of the person of *Shudra Varna* but in the sense of one afflicted with great sorrow. Raikwa addresses pautraayana as *Shudra* because *Pautraayana* was in a deep remorse on learning about the disrespect shown by the *Hamsa*. II 97II**

1.3.35 II ॐ क्षत्रियत्वावगतेश्चोत्तरत्र चैत्ररथेन लिङ्गात् ॐ II 98 II

**1.3.35 चः लिङ्गान्तरसमुच्चये | उत्तरत्र हि "अश्वतरीरथः" (छां ४-१-१) इत्युत्तरवाक्ये | श्रुतेनेति शेषः | चैत्ररथेन चित्रशब्दादश्वतरीयुक्तरथसम्बन्धित्वरूपेण लिङ्गात् | लिङ्गेन च ज्ञापकेन चास्य क्षत्रियत्वावगतेश्च | क्षत्रियत्वज्ञानात् | न पौत्रायणः शूद्र इत्यर्थः II 98 II**

1.3.35 The word *Shudra* in the context of conservation between Raikwa and *Pautraayana* cannot mean *Shudra Varna* because in the later portion it is clearly stated that *Pautraayana* possesses the special chariot drawn by *Mules* and from this, one can infer that *Pautraayana* was *Kshatriya* and not *Shudra*. II 98 II

1.3.36 II ॐ संस्कारपरामर्शात्तदभावाभिलापाच्च ॐ II 99 II

1.3.36 साध्यसमुच्चये च शब्दः | संस्कारपरामर्शात् "अष्टवर्षं ब्राह्मणमुपनीयत तमध्यापयीत" इत्येतच्छब्देन उपनयनाख्यसंस्कारयुक्तस्य वचनात् | तदभावाभिलापात् शूद्रस्य "नाग्निर्न यज्ञः" ( पैङ्गीश्रुतौ) इति संस्काराभावाभिधानात् | न तस्य वेदविद्याधिकार इत्यर्थः II 99 II

1.3.36 The *Vedas* prescribe that for eligibility in learning *Vedic* lores, one should have the *Samskaara* of *Upanayana*. It is also stated in the *Vedas* that Shudras do not have such *Samskaaras*.II 99 II

1.3.37 II ॐ तदभावनिर्धारणे च प्रवृत्तेः ॐ II 100 II

1.3.37 चोऽवधारणे | तदभावनिर्धारणे सत्यकामाख्यपुरुषस्य शूद्रत्वाभावनिश्चये सत्येव|प्रवृत्तेः गौतमस्य तदुपनयने प्रवृत्तत्वात् | अस्माज्ज्ञापकान्न शूद्रस्य संस्कारो युज्यत इत्यर्थः II 100 II

1.3.37 *Gautama* proceeds to perform the *Upanayana Samskaara* for *Satyakaama* only after he was convinced that *Satyakaama* was not a *Shudra*. This clearly brings out that *Upanayana Samskaara* cannot be performed for *Shudras*. II 100 II

1.3.38 II ॐ श्रवणाध्ययनार्थप्रतिषेधात् स्मृतेश्च ॐ II 101II

1.3.38 श्रवणाध्ययनार्थप्रतिषेधात् शूद्रस्य वेदश्रवणतदध्ययनतदर्थावधारणानां "श्रवणे त्रपुजतुभ्यां श्रोत्रपरिपूरणम्" (गौ ध १२-४-७) इति प्रतिषिद्धत्वात् | स्मृतेः नाग्निर्न यज्ञः शूद्रस्येति निषेधकस्मृतेश्च न तस्य वेदविद्याधिकार इत्यर्थः II 101 II

1.3.38 Further, there are clear statements in the *Shrutis* which prohibit for the *Shudras* even the hearing of the Vedas and also learning and understanding their meaning. There are also similar evidence in the *Smritis*.II 101| |

## ॥ कम्पनाधिकरणम् ॥ 1.3.10 ॥

### 1.3.39 ॥ ॐ कम्पनात् ॐ ॥ 102॥

**1.3.39 "महद्भयं वज्रम्" इति वज्रशब्दवाच्यो विष्णुरेव | न त्विन्द्रायुधम् | कुतः? कम्पनात् | "सर्वमेजनति" ( कठ २-३-२) इति कम्पनशब्दितसर्वचेष्टकत्व लिङ्गश्रवणादित्यर्थः ॥ 102 ॥**

**1.3.39 The entity referred to by the word Kampana is not the *Vajraayudha* as is commonly understood, but it means the Lord *Vishnu* because *Kampana* means the regulator and activator of the Universe and this feature is applicable only to Lord *Vishnu*. II 102| |**

## ॥ ज्योतिराधिकरणम् ॥ 1.3.11 ॥

### 1.3.40 ॥ ॐ ज्योतिर्दर्शनात् ॐ ॥ 103 ॥

**1.3.40 "योऽयमन्तर्ज्योतिः" ( बृ ६-३-७) इति ज्योतिश्शब्दवाच्यो विष्णुरेव | न जीवः | कुतः? दर्शनात् "विष्णुरेव ज्योतितिः" ( चतुर्वेदशि.) रिइति श्रुतेरित्यर्थः ॥ 103 ॥**

**1.3.40 The word *Jyotish* appearing in *Shrutis* should essentially mean Lord *Vishnu* and not *Jiva* because it is clearly specified in the Shrutis that Vishnu himself is *Jyotish*. The word *Jyotish* considered here is the one which is known for its dual-meaning as *Jiva* and *Vishnu* (*Ubhayatra Prasiddha*). II 103 II**

## ॥ आकाशाधिकरणम् ॥ 1.3.12 ॥

### 1.3.41 ॥ ॐ आकाशोऽर्थान्तरत्वादिव्यपदेशात् ॐ ॥ 104॥

**1.3.41 "आकाशो ह वै नाम" इति श्रुत्युक्ताकाशो विष्णुरेव | न त्वव्याकृताकाशः | कुतः? अर्थान्तरत्वादिव्यपदेशात् | "ते यदन्तरा" (छां ८-१४-१ ) इति वाक्ये विष्णोर्नामरूपराहित्याख्यविलक्षणार्थत्वस्य आदिशब्दगृहीतब्रह्मत्वामृतत्वयोश्च उक्तत्वादित्यर्थः॥ 104 ॥**

**1.3.41 The word *Akaasha* used in the *Shrutis*, refers to Lord *Brahma* and not to the physical sky because, in the same *Shruti*, *Akaasha* is described to have features of not having name or form and of being *Amruta* and *Brahma*. These features are applicable only to Lord *Vishnu*. II 104| |**

## ॥ सुषुप्त्यधिकरणम्| | 13 ॥

### 1.3.42 ॥ ॐ सुषुप्त्युत्क्रान्त्योर्भेदेन ॐ ॥ 104॥

**1.3.42 "स यत्तत्र किञ्चित्पश्यति" (बृ ६-३-१५) इति श्रुत्युक्तस्वप्नादिद्रष्टा परमात्मैव | न जीवः | कुतः? "असङ्गोह्ययं पुरुषः" इत्युक्तासङ्गत्वलिङ्गादिति हेतुर्बहिरेवाध्याहार्यः | नन्वीश्वराभेदेन जीवेऽप्यसङ्गत्वोक्तिः सम्भवतीत्यत उक्तं | सुषुप्तीत्यादि | तथा च सुषुप्त्युत्क्रान्त्योः "प्राज्ञेनात्मना संपरिष्वक्तः" (बृ ६-३-२१) इति "प्राज्ञेनात्मनाऽन्वारूढः" (बृ ६-३-३५) इति च सुषुप्त्युक्रान्तिप्रकरणयोः | भेदेन जीवेशयोर्भिन्नत्वेनोक्तेः |न तयोरैक्यमित्यर्थः ॥ 105 ॥**

**1.3.42 The entity who perceives the *Swapnas* the object in dreams is Lord *Vishnu* himself and not *Jiva* because the perceiver is described to have the feature of being totally detached (*Asanga*) and this feature is applicable only to Lord *Vishnu*. We cannot argue that *Jiva* and *Vishnu* are undifferentiated and hence both have the feature of undifferentiated and hence both in the *Prakarana* dealing with the topic of *Sushupti* (deep sleep) and that dealing with that *Jiva* is closely embraced with the form of *Vishnu* called *Praajna* and thus *Jiva* and *Vishnu* are distinct from each other. II 105 II**

## ॥ ब्राह्मणाधिकरणम् ॥1.3.14 ॥

### 1.3.43 ॥ ॐ पत्यादिशब्देभ्यः ॐ ॥ 106॥

**1.3.43 "एष नित्यो महिमा ब्राह्मणस्य" (बृ ६-४-२२) इति श्रुत्युक्तब्राह्मणो विष्णुरेव | न विरिञ्चः | कुतः? पत्यादिशब्देभ्यः | सर्वस्याधिपतिरित्यादिसर्वाधिपत्यादिवाचि (बृ ६-४-२२) श्रुतिभ्य इत्यर्थः ॥ 106 ॥**

**1.3.43 The word *Brahma* appearing in the *Shruti* refers to Lord *Vishnu* and not to *Chaturmukha Brahma* because in the same *Shruti*, *Brahma* is described to be commander of everything (*Isha*, *Ishaana*) supreme to everybody (*Pati*) and these features are applicable only to Lord *Vishnu*. II 106 II**

## ॥ इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रेषु श्री जगन्नाथयतिकृतायां सूत्रदीपिकायां प्रथमाध्यायस्य तृतीयः पादः ॥

### ॥ श्री कृष्णार्पणमस्तु ॥

# श्री कृष्णद्वैपायन कृत ब्रह्मसूत्राणि
# श्री जगन्नाथयतिकृत सूत्रदीपिका सहितानि ।

| श्री मद्धहनुमभीममध्वांतर्गत रामकृष्ण वेदव्यासात्मकश्रीलक्ष्मीहयग्रीवायनमः |

॥ हरिःॐ ॥

कृष्णं रामं नरसिंहं व्यासं नत्वा गुरुनपि ।
जगन्नाथाख्य यतिना क्रियते सूत्रदीपिका ॥

## ॥ प्रथमाध्यायः (समन्वयाध्यायः) ॥

## चतुर्थः पादः (अन्यत्रैवप्रसिद्धनामलिङ्गात्मकशब्दसमन्वयपादः)

### ॥ आनुमानिकाधिकरणम् ॥ 1.4.1 ॥

**1.4.1 ॥ ॐ आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च ॐ ॥ 107॥**

**1.4.1 अपिरेवार्थे | चः स्मृतिसमुच्चये | तथा च यतः आनुमानिकं साङ्ख्यानुमानकल्पितं प्रधानाद्येव | एकेषं शाखिनां शाखासु स्तिथैः "अव्यक्तात्पुरूष :" (कठ 1-3-11) इत्यादिवाक्यगताव्यक्तादिशब्दैरुच्यते | अतो न विष्णोः सर्वशब्दवाच्यत्वं युज्यत इति चेन्न! यतः विष्णुरेवाव्यक्तादिशब्दवाच्यः | न प्रधानादिः | तत्कुतः? यतः "अव्यक्तं" (पिप्पलादश) इति श्रुतिः | अव्यक्तोऽक्षर (भ गी - 8-21) इति स्मृतिश्च | दर्शयति विष्णोरेवाव्यक्तादिशब्दवाच्यत्वं प्रतिपादयति | अत इत्यर्थः | कथं तर्हि अन्यत्राव्यक्तादिशब्दव्यवहार इत्यत उक्तं | शरीररूपकेत्यादि | कप्रत्ययः कुत्सने | तथा च शरीररूपकविन्यस्तगृहीतेः | यथा शरीरं पुरूषतन्त्रम् | तथा परमात्मतन्त्रत्वेन निमित्तेन शरीरसमे कुत्सितत्वात् | वस्तुतः अशरीरे प्रधानादौ | विन्यस्तस्य स्थितस्य परमात्मन् एवाव्यक्तादिशब्दैः गृहीतेर्ग्रहणात् | तथा च परमात्मसम्बन्धादेवान्यत्र प्रकृत्यादावव्यक्तादिशब्दवाच्यत्वव्यवहार इत्यर्थः ॥ 107 ॥**

**1.4.1 The word *Avyakta* essentially (by *Mukhya Vrutti*) means *Brahma* and not *Pradhaana* as assumed in some schools of thought, because there is clear evidence from *Shrutis* in this regard. It is because Lord *Brahma* called *Avyakta* resides as an inner motive force within the *Pradhaana* just as He resides inside all the bodies. *Pradhaana* is also called as *Avyakta* in common parlance. Just as this wretched body of *Jiva* is subservient to the supreme Lord residing in it, *Pradhaana* is also under the control of the Lord *Brahma* called *Avyakta*. II 107 II**

## 1.4.2 ॥ ॐ सूक्ष्मं तु तदर्हत्वात् ॐ ॥ 108॥

**1.4.2 यतः सूक्ष्मं तु सूक्ष्ममेवाव्यक्तशब्दवाच्यम् | कुतः? तदर्हत्वात् | तस्य सूक्ष्मस्य अव्यक्तशब्दप्रवृत्तिनिमित्तयोग्यत्वात् | तत्र च सूक्ष्मत्वं विष्णोरेव | अतस्तस्तैवाव्यक्तशब्दवाच्यमित्यर्थः ॥ 108 ॥**

**1.4.2.: Only that entity which is very minute (*Sookshma*) is eligible to justify the essence of the meaning of the word *Avyakta*, i.e., unmanifest. Lord *Vishnu* alone has the capability of being microcosm and hence He alone can be called *Avyakta*.II 108II**

## 1.4.3.॥ ॐ तदधीनत्वादर्थवत् ॐ ॥ 109 ॥

**1.4.3 दर्शयति चेत्यत्रत्यश्चशब्दोऽनुवर्तते | परमात्मन्येव परावरदुःखिबद्धत्वादिवाचिशब्दजातम् | अर्थवत् प्रवृत्तिनिमित्तरूपार्थवत् | न व्यर्थम् | कुतः ? तदधीनत्वात् तेषां प्रधानादिगतपरावरत्वादिधर्माणां भगवदधीनत्वात् | तथा चान्यगतप्रवृत्तिनिमित्तस्वामित्वेन निमित्तेनापि भगवति परावरादिशब्दप्रयोगो युक्त एवेत्यर्थः ॥ 109 ॥**

**1.4.3 All the words having *Panchami Vibhakti* indicating relative inferiority, are meaningful in the Lord *Brahma* because the features reflecting this inferiority are subservient to the Supreme Lord. Just as we often say that the King is victorious, even though the army subordinate to him was indeed victorious, in the same way we could meaningfully apply the words of inferiority substance to refer to the Supreme Lord. II 109 II**

## 1.4.4.॥ ॐ ज्ञेयत्वावचनाच्च ॐ ॥ 110 ॥

**1.4.4.: "तमेवैकं जानथ " ( मु - 2-2-5) इति विष्णोरेव मोक्षार्थं ज्ञेयत्ववचनात् | अन्येषां तदवचनात् | प्रत्युत विमुञ्चथेति हेयत्ववचनात् | अत्रत्याव्यक्तादि शब्दैः विष्णुरेव वाच्य इत्यर्थः ॥ 110 ॥**

**1.4.4.:The words like *Avyakta, Jiva* etc. mean *Para Brahma* by *Mukhya Vrutti* (essential inference), and not *Pradhaana* etc. because later in the same *Shruti* it is stated that *Avyakta* should be understood by all those desirous of emancipation and that *Pradhaana* etc, should be discarded. It is accepted that it is Lord *Brahma* who should be understood by all those desiring freedom from bondage. II 110 II**

## 1.4.5.: II ॐ वदतीति चेन्न प्राज्ञो हि ॐ II 111II

**1.4.5 ननु अनाद्यनन्तमिति काठकवाक्यम् | वदति प्रधानं प्रतिपाद्यते | इतीति तस्यापि ज्ञेयत्वमस्तीति चेन्न | कुतः ? हि यतः | प्राज्ञः प्राज्ञशब्दितः परमात्मैव तत्र प्रतिपद्यते न प्रधानम् | अतो न तस्य ज्ञेयत्वं मन्तव्यमित्यर्थः II 111 II**

**1.4.5 We cannot argue that some *Shruti* it is stated that those who are desirous of *Moksha* could adore and meditate upon the entity which is above the *Mahattatwa* and hence *Avyakta* which is next in superiority to *Mahat* is described to be the entity which should be understood by the *Mumukshus*. Because, even in that *Shruti*, Lord *Vishnu* is referred to by words *Mahataam Para*. Since Lord *Vishnu* is superior to everything else, He is obviously superior to *Mahattatwa*. II 111 II**

## 1.4.6II ॐ प्रकरणात् ॐ II 112 II

**1.4.6 वैष्णवरूपाणां त्रयाणां प्रकरणबलाच्च प्राज्ञ एवात्र प्रतिपाद्य इत्यर्थः II 112 II**

**1.4.6.: In this *Prakarana*, it is stated that one who performs *Upaasanaa* of the entity described in it realises *Vishnu Paada*. In view of this, we could infer that *Vishnu* is the entity whose *Upaasanna* is prescribed here. II 112 II**

## 1.4.7 II ॐ त्रयाणामेव चैवमुपन्यासः प्रश्नश्च ॐ II 113 II

**1.4.7 युक्तिसमुच्चये चो यत इत्यर्थे च | एवशब्दः प्रकारत्रैविध्यपरामर्शकः | तथा च यतः एवं त्रयाणामेव पितृसौमनस्यस्वर्ग्याग्निपरमात्मरूपाणां त्रयाणामेव | तद्विषयक एव प्रश्नः नचिकेतरूपिणा यमं प्रति कृतः | तेषामेवोपन्यासः प्रतिवचनं चात्र प्रकरणे दृश्यते | अतो नात्र प्रधानं प्रतिपाद्यमित्यर्थः II 113 II**

**1.4.7 In the relevant Chapter (*Prakarana*), *Pradhaana* is not considered for the explanation. Three themes discussed in that Chapter of *Kathopanishad*, in response to three questions of enquiry put forth by *Nachiketa* to *Yama* are concerned with the following:-**

**i. Pacified mood of the father of *Nachiketa*.**
**ii. The lore of sacrificial fire leading to the heaven (*Swargyaagni Vidya*) and**
**iii. Worshipping Lord Brahma.**
**Hence, *Avyakta* does not mean *Pradhaana* but Lord *Brahma* himself. II 113 II**

1.4.8 II ॐ महद्वच्च ॐ II 114 II

**1.4.8 चः दार्ष्टान्तिक समुच्चये | "महान्तं विभुमात्मानम्" (कठ 1-2-22) इत्यादिवाक्यगत महच्छब्दस्य यथा विष्णुपरत्वमेव न महत्तत्वपरत्वं तद्वदव्यक्तादिशब्दस्यापीत्यर्थः II 114 II**

**1.4.8 The word *Mahat* though most commonly used to mean *Mahattatwa*, has essentially the meaning of Lord *Brahma* because basic features of being Great indicated by the word *Mahat* are essentially applicable to Lord *Brahma* and not to anybody else. In a similar way, the word *Avyakta* essentially means Lord *Brahma* because basic features reflected in the word *Avyakta* are applicable to Lord *Brahma* himself.II 114 II**

1.4.9 II ॐ चमसवदविशेषात् ॐ II 115 II

**1.4.9 चमसवत् यथा यज्ञपात्रे प्रसिद्धस्यापि चमसशब्दस्य "इदं तच्छिरः" (बृ 4-1-3) इति श्रुतिबलेन शिरोवाचकता तद्वदव्यक्तादिशब्दस्य प्रधानादौ प्रसिद्धत्वेऽपि विष्णुवाचकत्वमेव | कुतः? "नामानि" इतिश्रुतेः | ननु तथापि कुतो विष्णुवाचकत्वमित्यत उक्तम् | अविशेषादिति | "नामानि सर्वाणि" इति श्रुतेः "इदं" इति श्रुत्या विशेषाभावादित्यर्थः II 115 II**

**1.4.9 The word *Chamasa* in its common usage, means the sacrificial vessel but its prime meaning is taken as head. The context of the debate on the prime meaning of the word *Avyakta* is also similar to this. Hence, prime meaning of *Avyakta* would be Lord *Brahma* and not *Pradhaana*. II 115 II**

## II ज्योतिरूपक्रमाधिकरणम्II 1.4.2 II

1.4.10II ॐ ज्योतिरूपक्रमात्तु तथा ह्यधीयत एके ॐ II 116II

**1.4.10 तु शब्द एवार्थे | ज्योतिः "ज्योतिषा यजेत" इत्यादिवाक्योक्तज्योतिरादिशब्दवाच्यम् ब्रह्मैव न ज्योतिष्टोमादि | कुतः? हि यस्मादेके शाखिनः | उपक्रमात् "एष इमम्" इत्युपक्रम्य तथा सर्वशब्दाभिधेयत्वेन हरिमेव "ता वा एताः"( ऐ आ 2-2-2) इत्यत्राधीयते पठंति तस्मादित्यर्थः II116 II**

**1.4.10 The word *Jyotish* referring to the *Jyotishtoma Yajna* in the context of a *Shruti*, has the prime meaning of Lord *Brahma* because this is how all the words are interpreted to refer to Lord *Brahma* by the use of various interpretative approaches such as etymological meaning(*Yougika*), more etymology (*Mahaayaaga*) and usage by the learned (*Vidwadrudhi*). II 116 II**

## 1.4.11 ॥ ॐ कल्पनोपदेशाच्च मध्वादिवदविरोधः ॐ ॥ 117॥

**1.4.11 च एवार्थे | समुच्चये वा | तथा च मध्वादिवत् यथा मधुविद्यादिगतमध्वादिशब्दानां विष्णुवाचित्वेऽप्यविरोधः | न लौकिकक्षौद्रादिवाचकशब्दाभावेन तदभावाख्यविरोधः | तथा परमात्मनः सर्वशब्दवाच्यत्वेऽभ्युपगतेऽपि न कर्माद्यभावविरोधः | कुतः? शब्दानामन्यत्र योगरूढिवृत्ती अभ्युपगम्यैवेश्वरे महायोगवृत्त्यङ्गीकारादित्यध्याहारः | तदपि कुतः? कल्पनोपदेशात् | "प्राण ऋचः" इति सर्वशब्दवाच्यत्वस्य विष्णोः कल्पनाशब्दितोपासनार्थमुक्तत्वात् | तस्य च सर्वशब्दार्थमुख्यगुणवत्त्वरूपमहायोगवृत्तिं विनाऽयोगादित्यर्थः ॥ 117 ॥**

**1.4.11 To interpret *Avyakta* to have the prime meaning of *Brahma* does not conflict with its use in prescribing and implementing the *Karmas*. Keeping in view the meanings in common usage, the approach of more significant etymology (*Mahaayoga*) will have to be invoked to derive the prime meaning. Interpretation of the *Avyakta* as *Brahman* has the purpose of facilitating *Upaasana* and worshipping Lord *Brahma* as an entity who is described by all *Vedic* words. This approach does not disturb the use of same words for common worldly activities. For example, the word *Madhu* is used in its prime sense, to refer to Lord *Vishnu* residing inside the Sun, and in its secondary sense to refer to the honey. ll 117ll**

### ॥ नसंख्योपसङ्ग्रहा(पंचजना)धिकरणम् ॥ 1.4.3 ॥

## 1.4.12 ॥ ॐ न संख्योपसंग्रहादपि नानाभावादतिरेकाच्च ॐ ॥ 118 ॥

**1.4.12 संख्योपसंग्रहात् | "यस्मिन्पञ्च पञ्चजना" (बृ 6-4-18) इति बहुत्वसङ्ख्यावचनात् | अपि यस्मिन्नित्याधाराधेयभावनिर्देशादपि | विष्णोः पञ्चजनादिशब्दवाच्यत्वे विरोधो नास्ति | कुतः? नानाभावत् | भगवतः बहुरूपाणां सत्त्वात् | अतिरेकाच्च यस्मिन्नित्युक्ताधाररूपस्य पञ्चजना इत्युक्ताधेयरूपस्य सविशेषाभिन्नत्वाच्चे त्यर्थः ॥ 118 ॥**

**1.4.12 Here the words dealing with large numbers are reconciled to mean Lord *Brahma*. In the Phrase "*Pancha Pancha Janaaah*" the words *Pancha Pancha* refer to Lord *Brahma* in their prime meaning and not the five entities viz. *Praana*, Eyes, Ears, Food and Mind. All the reasonings, given earlier, justifying such interpretation, are applicable, since the entities like *Praana*, Eyes etc., are under the control of Lord *Brahman*, as such the words used to describe the commanding entities. Further, it is not prescribed that these subordinate entities should not be understood to be eligible for *Moksha*. Lord *Brahma* has several forms which, though not distinct from each other, can be distinguished from each other on account of "*Vishesha*". Further, the features of the 'resort' and 'resortee' (*Aadhaara* and *Aadheya*) are applicable to the same Lord *Brahma*. ll 118 ll**

**1.4.13 II ॐ प्राणादयो वाक्यशेषात् ॐ II 119 II**

**1.4.13 भगवद्रूपत्वेनोक्ताः पञ्चजनास्तु प्राणादेः प्राणादयः द्वितीयानिर्दिष्टप्राणचक्षुः श्रोत्रान्नमनोभधाः ज्ञेयाः | कुतः? वाक्यशेषात् ते च भगवद्रूपविशेषा एव | कुतः? विष्णोरन्यत्रासम्भावितप्राणप्राणप्रदत्वादिप्रतिपादकं "प्राणस्य प्राणम्" (छां 6-4-18) इत्यादि वाक्यशेषादित्यर्थः II 119 II**

**1.4.13 The entities which give the respective capabilities in the *Praana*, Eyes, Ears, Food and Mind are nothing but the different forms of Lord *Brahma* because it is only He who has the prowess to bestow these capabilities and this inference is indicated by the remaining part of the text in the same *Shruti*. II 119 II**

**1.4.14 II ॐ ज्योतिषैकेषामसत्यन्ने ॐ II 120II**

**1.4.14 एकेषां कण्वादीनां शाखायाम् | अन्ने अन्नाख्यभगवद्रूपे | असति अनुक्तेऽपि | ज्योतिषा तदाख्यभगवद्रूपेण पञ्चत्वसङ्ख्यापूर्तिर्ज्ञातव्येत्यर्थः II 120 II**

**1.4.14 According to** school **of thought of *Kanwas*, if Food (*Anna*) is not one of the given entities, *Jyotish* or the *Brahma* in the form of lustre could be regarded as the fifth entity. The two systems of counting the five entities with *Anna* as the fifth entity or with *Jyotish* as the** fifth **entity can be mutually reconciled by arguing either that *Jyotish* and *Anna* mean the same thing or that these different sets of five are meant for *Upaasana* by different types of eligible people.II 120II**

**II आकाशाधिकरणम् II 1.4.4 II**

**1.4.15 II ॐ कारणत्वेनचाकाशादिषु यथा व्यपदिष्टोक्तेः ॐ II 121 II**

**1.4.15 "आत्मनः आकाशः सम्भूतः आकाशाद्वायुः" ( तै. 2-1-2) इत्यादौ कार्यत्वे सति कारणत्वरूपावान्तरकारणवाचकाकाशादिशब्दैराकाशादिषु स्थितो विष्णुरेव | कारणत्वेन चशब्दात् कार्यत्वेन चोच्यते न भूतम् | कुतः? यथा व्यपदिष्टत्वोक्तेः | "स योऽतोऽश्रुतः "(ऐ आ -3-1-4) इत्यादौ विष्णुर्यथा यादृशेनाविदितत्वादिरूपेण व्यपदिष्टः उक्तः | तद्रूपयुक्तस्यैवाकाशादिषु "यमाकाशो न वेद" (बृ 4 -7-12) इत्यादिवाक्येनोक्तत्वादित्यर्थः II 121 II**

**1.4.15 The entity *Akaasha* described in the *Shruti*, both as cause and as the effect, refers to Lord *Vishnu* residing in it and not to the physical entity of *Akaasha*. Just as *Vishnu* was described in one context as the** entity **that cannot be understood, in**

the same way here also, it is described that entity inside the *Akaasha* is the one that cannot be fully understood. II 121 II

### II समाकर्षाधिकरणम् II 1.4.5 II

### 1.4.16 II ॐ समाकर्षात् ॐ II 122 II

**1.4.16 स्वतो मुख्यवृत्त्या परमात्मवाचिनः शब्दान् | ततः समाकृष्यान्यत्र वाचकत्वशक्त्यङ्गीकारात् | नान्यत्र व्यवहारलोपप्रसङ्गइत्यर्थःII 122 II**

1.4.16 All the *Vedic* words by prime relevance (*Mukhya Vrutti*) signify Lord *Vishnu* by the special power of Drawal (*Samaakarsha*), the same words could also be used to refer to the objects of common activities of the world. II 122II

### 1.4.17 II ॐ जगद्वाचित्वात् ॐ II 123II

**1.4.7 लोकव्यवहाराच्छब्दानां जगद्वाचित्वज्ञानात्तेषां तत्र प्रसिद्धिर्युक्तोत्यर्थः II 123 II**

1.4.17 Since the words, due to everyday common use signify the objects of everyday life, they are obviously well-known in those uses, concealing their prime reference to *Brahman*.II 123II

-

### 1.4.18 II ॐ जीवमुख्यप्राणलिङ्गादिति चेत् तद्वयाख्यातम् ॐ II 124II

**1.4.18 "अस्य यदैकां जीवो जहाति" (छा 11-2) इति "वायुना हि लोका नेनीयन्ते" इति वाक्ये च | जीवमुख्यप्राणलिङ्गात्जीवमुख्यप्राणलिङ्गयोः श्रवणात् | तयोरपि तत्तच्छब्दमुख्यवाच्यता स्यादिति चेन्न | कुतः ? यस्मात्तद्वाक्यजातं तत्तदन्तर्यामिपरतया व्याकृतं तस्मादित्यर्थः II 124 II**

1.4.18 Earlier many words were reconciled in Lord *Brahma* on the reasoning that the entities denoted by them are under the control of Lord *Brahma*, However, in many contexts in the *Shruti*, it is stated that as *Jiva* leaves, everything dries up or that *Mukhya Prana* leads all the beings into activities, and hence it appears that *Jiva* and *Mukhya Prana* are also the controlling entities. This is not so because in all such contexts it is explained that Lord *Vishnu* is the inner commanding entity (*Antaryaami*) in *Jiva* and *Mukhya Prana* and it is He who motivates everything into action. II 124 II

## 1.4.19 II ॐ अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके ॐ II 125 II

**1.4.19 तु शब्द एवार्थे | एतेन विष्णोरन्यत्र शब्दान् समाकृष्य कर्मादिप्रतिपादनमपि युक्तमेव | कुतः? यस्मात् अन्यार्थं परमात्मज्ञानार्थमेव तत्कुत इति चेत् | प्रश्नव्याख्यानाभ्याम् कस्मिन्निति शौनकप्रश्नात् "द्वे विद्ये" इति अङ्गीरसोवचनात् तथा कथन्विति शौनकप्रश्नात् तथा कथन्वितिश्वेतकेतुप्रश्नात् यथा सौम्येत्युद्दालकवचनाच्च (छा 6-1) इति जैमिनिराचार्यो मन्यते | किंच एको शाखिनः स्पष्टं "यस्तं न वेद" ( 1-164-39) इति अन्यज्ञानस्य परमात्मज्ञानार्थतां पठन्ति तस्मादपीत्यर्थः II 125 II**

**1.4.19 Drawing away the words from their prime meaning of *Vishnu* for facilitating their use in worldly activities is also meant to promote knowledge of Lord *Brahma*. This is understood by close scrutiny of the questions put forth by *Shounaka* and the explanations given by *Angirasa*, and also of the questions put forth by *Shwetaketu* and the explanations given by *Uddalaka*. In all these contexts the significance of the knowledge of *Para Brahma* is well brought out. This is the view of Sage *Jaimini*. II 125II**

## 1.4.20 II ॐ वाक्यान्वयात् ॐ II 126 II

**1.4.20 ब्रह्मणि वाक्यसमन्वयमपेक्ष्य वेदेन कर्मादिकमपि प्रतिपादनीयमित्यर्थः II 126 II**

**1.4.20 The prime relevance of the *Vaidika* words which apparently signify the worldly objects and actions(*Karma*), in referring to Lord *Brahma* is meant for facilitating a consistent interpretation of the complete sentences of *Vedic* text in relation to Lord *Brahma*. II 126 II**

## 1.4.21 II ॐ प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः ॐ II 127 II

**1.4.21 वेदेन कर्मादिप्रतिपादनम् | यतः प्रतिज्ञासिद्धेः | लिङ्गं ज्ञानमेव मोक्षहेतुः नान्यदित्येवं रूपायाः "नान्यः पन्थाः" (तै आ 3-12-7) इति प्रतिज्ञातार्थसिद्धेस्साधकम् | अतस्तदुपयोगित्वेन तत्प्रतिपादनं युक्तमित्याश्मरथ्याचार्यो मन्यत इत्यर्थः II 127 II**

**1.4.21 Sage *Ashmarathya* believes that the purpose of using *Vedic* words to signify worldly actions and objects is necessarily meant for convincingly establishing the thesis that knowledge is the only instrument for achieving salvation and not *Karma*. If actions (*Karmas*) are explained in details, the ultimate futility of their results will be demonstrated and thereby the prime status of knowledge is clearly established. II 127II**

### 1.4.22 II ॐ उत्क्रमिष्यत एवं भावादित्यौडुलोमिः ॐ II 128 II

**1.4.22 उत्क्रमिष्यतः ज्ञानान्मोक्षमिच्छतोऽधिकारिणः | एवं ज्ञानसाधनतया | भावात् कर्मादेरप्यनुष्ठेयत्वान्मोक्षार्थज्ञानसाधनत्वेन वेदेन कर्मादिप्रतिपादनं युक्तमेवेति औडुलोमिराचार्यो मन्यत इत्यर्थः II 128 II**

**1.4.22 Sage *Audulomi* opines that for every eligible person desiring to realise salvation through the path of Knowledge, the performance of action(*Karmas*) is an extremely essential step for acquiring purity of mind and thereby realising greater devotion and inquisitiveness for true Knowledge- *Jijnaasa*. Hence, the use of the *Vedic* words to describe *Karmas* is justified. II 128 II**

### 1.4.23 II ॐ अवस्थितेरिति काशकृत्स्नः ॐ II 129 II

**1.4.23 सर्वाधारे भगवति कर्मादीनाम् अवस्थितेः अवस्थानात् | भगवतः कर्माद्याधारत्वज्ञानायाधेयभूतकर्मादिस्वरूपं वेदेन प्रतिपाद्यत इति काशकृत्स्नाचार्यो मन्यत इत्यर्थः | अनेकाधिकारिकत्वान्मतानां न विरोध इति ध्येयम् II 129 II**

**1.4.23 Sage *Kaasha Krutsna* holds the view that if we have to acquire the conviction that Lord *Brahma* is the ultimate Resort for everything in the world, such as *Karma*, deities etc, we should acquire knowledge about *Karmas* and the worldly objects which are all dependent on Him. Hence, the use of the *Vedic* words to describe the worldly actions is justified. II 129 II**

## II प्रकृत्यधिकरणम् II 1.4.6 II

### 1.4.24 II ॐ प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् ॐ II 130 II

**1.4.24 ईश्वरः न केवलं पुल्लिङ्गाभिधेयः | किंतु प्रकृतिः | सैषा प्रकृतिरित्याध्युक्तप्रकृत्यादिस्त्रीलिङ्गशब्दवाच्यश्च भवति | कुतः? एवं सत्येव प्रतिज्ञादृष्टान्तानुपरोधात् हन्तैतमिति प्रतिज्ञायाः यथेति नदीसमुद्रदृष्टान्तस्य चानुपरोधात् अविरोधात् | अन्यथा तद्विरोधः स्यादित्यर्थः II 130 II**

**1.4.24 Lord *Brahma* is referred to not only by words of masculine gender but also by all words of feminine gender. The word *Prakriti* and all such feminine gender words signify Lord *Vishnu*. It is only if such interpretation is accepted that various statements and similies and examples given in the *Shruti* become appropriate. II 130II**

1.4.25 II ॐ अभिध्योपदेशाच्च ॐ II 131 II

1.4.25 अभिध्यायाः ईश्वरेच्छायाः | उपदेशात् "मायातु" ( श्वे 4-10) इति श्रुतौ प्रकृतिशब्द वाच्यत्वोक्तेश्च इच्छाभिन्नेश्वरस्यापि तच्छब्दवाच्यत्वच्चेत्यर्थः II 131 II

1.4.25 The word *Prakriti* signifies Lord *Brahma* because it is preached in the *Smrities* that Lord *Brahma* is in the form of His desire referred to by the word *Prakriti*. II 131 II

1.4.26 II ॐ साक्षाच्चोभयाम्नानात् ॐ II 132 II

1.4.26 चःअवधारणे | साक्षात् द्वारमन्तरेणैव | उभयाम्नानात् "एषस्त्वैष पुरुषः" (पैङ्गीश्रुतिः) इति वाक्येन प्रकृतिपुरुषोभयशब्दवाच्यत्वाभिधानात् ईश्वरस्य प्रकृत्यादिशब्दवाच्यत्वमावश्यकमित्यर्थः II 132 II

1.4.26 The feminine words like *Prakriti* also should signify Lord *Brahma* because in a single context Lord *Vishnu* is directly described as both feminine (*Stree*) and masculine(*Purusha*). II 132 II

1.4.27 II ॐ आत्मकृतेः परिणामात् ॐ II 133 II

1.4.27 प्रकृतिपरिणामं विधाय तत्प्रेरणाय | आत्मकृतेः स्वस्य बहुधाकरणात् प्रकृतिशब्दवाच्यो विष्णुरेवेत्यर्थःII 133 II

1.4.27 The word *Prakriti* would also mean special action. Since Lord *Brahma* causes the transformation of the *Prakriti* and thereby demonstrated the diversity of His Special Actions, He is aptly described by the word *Prakriti*. II 133 II

1.4.28 II ॐ योनिश्च हि गीयते ॐ II 134 II

1.4.28 हि यस्मात् | ईश्वरः "यद्भूतयोम्"(मुं 1-1-6) इति श्रुत्या योनिः स्वदेहादेवापत्योत्पादकश्च गीयते प्रतिपाद्यते | तस्मात्प्रकृत्यादिस्त्रीलिङ्गशब्दवाच्य इत्यर्थः II 134 II

1.4.28 Lord *Brahma* can be described by all the feminine words because in many contexts His capability to reproduce from his own body is well narrated. II134II

## ॥ एतेन सर्वे व्याख्याताधिकरणम् ॥ 1.4.7 ॥

**1.4.29 ॥ ॐ एतेन सर्वे व्याख्याता व्याख्याताः ॐ ॥ 135 ॥**

**1.4.29 एतेन पूर्वोक्तहेतुनैव | सर्वे शून्यादिशब्दाः | व्याख्याताः मुख्यतो भगवद्वाचिन एवेत्यर्थः | एतदध्यायादिमारभ्यान्तमुक्तस्यार्थस्य इत्थमेवेत्यवधारणार्थमध्यायान्ते द्विरुक्तिः ॥ 135 ॥**

**1.4.29 As a result of the reasoning given in the earlier sections, all *Vedic* words- even those signifying *Null* and *Void* etc. would have the prime meaning of Lord *Vishnu*. This is firmly True and True only. II 135 II**

**|| इति श्री जगन्नाथयति कृतायां सूत्रदीपिकायां प्रथमाध्यायस्य चतुर्थः पादः ||**

**॥ इति श्रीमत्कृष्णद्वैपायनकृत ब्रह्मसूत्रेषु प्रथमाध्यायस्य चतुर्थः पादः ॥**

**॥ इति प्रथमाध्यायः (समन्वयाध्यायः) समाप्तः॥**

**॥ श्री कृष्णार्पणमस्तु ॥**